Title वैयाकरण भूषणसारटीका

Author वनमालिमिश्रः

Extent १४ Age +

Subject व्याकरण

नं० १६२-घ

वैयाकरणभूषणसारटीका

वैयाकरणमतोन्मज्जनाख्या

पत्राणि १४

१६२-घ

१४ पत्राणि

नं० १६२ - घ

वैयाकरणभूषणसार टीका
वैयाकरण मतोन्मज्जनाख्या
पत्राणि १४

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते १

ॐ श्रीगणेशाय नमः ॥ जगतः पितरौ नत्वा पार्वतीपरमेश्वरौ गुरुभिर्ये कृताः श्लोकास्टीका तेषां वितन्यते । इह शास्त्रार्थज्ञाने पाधिकजिज्ञासुभिः समस्तमाह
शब्दकौस्तुभ आज्ञेयः इति ध्वनयन्तो मङ्गलार्थं व्याकरणशास्त्रनिर्माणं ऽर्हितत्वाच्छ्रीपतञ्जलिं स्मरन्ति फणीति । पदार्थसंसर्गरूपत्वाद्वाक्यार्थस्य वाक्यस्य च
तिङन्तस्य प्राधान्यात्तदन्तानां च प्रायः क्रियाविशेषणत्वाद्धातोश्च क्रियावाचकत्वाद्धातोः स्वरूपं वदन्ति फलव्यापारयोर्धातुराश्रये तु तिङः स्मृ-
ताः फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् २ फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्व-
यम् ३ ॥ प्रातिस्विकरूपेण पचित्यादिना फलं विक्लित्यादि सकलधात्वनुगतेन धातुत्वेन व्यापारोऽर्थः धातोः स्मृतः समनुषज्यते आश्रये
कर्तृकर्मान्यतरस्मिन् यद्यपि भवति तिङस्तथापि तस्यैकवचनमुत्सर्गप्राप्तमायसिद्धत्वात् साधुत्वार्थत्वादाग्रहेण कृतः "विक्लित्यादौ व्या-
पारे विशेष्यः तिङर्थस्त्विति फलव्यापारयोरित्यनेनान्वयः तिङर्थः कर्तृकर्मसंख्याकालाः कर्तृकर्मणी व्यापारे विशेषणे संख्यात-
योः कर्मणि तिङि सति संख्यामात्रं तिङर्थः फलाश्रये कर्मणि विशेषणम् कालः व्यापार एव कर्तृवाचकसमभिव्याहारं विना कर्तृ-
संख्योदासीनता पच्यते ओदनः एकोऽग्न्याश्रयिका या विक्लित्तिस्तदनुकूलसाम्प्रतिकी भावनेति बोधः कर्तृवाचकसमभिहारे तु कर्तृ-
संख्यास्तु वधीना कर्तरि तिङि सति तिङर्थः कर्तृकालौ व्यापारे विशेषणं संख्या तु कर्तरि कर्मवाचकाश्रवणे तत्रोदासीनम् तद्वाचकश्रवणे
तु कर्मस्थसंख्यास्तु वधीना पचति एकाश्रयिका विक्लित्तिफलिका भावनेति बोधः ननु कर्तृप्रत्ययोपात्तत्वात् संख्यावत् कालस्यापि कर्तृकर्मणो-
रेवान्वयोऽस्तु मैवम् अनुभवविरोधात् न हि पचति पच्यतेऽस्यादौ कर्तृकर्मणोर्वर्तमानत्वादिप्रतीतिः यत्र क्रमस्तु यनेन कालस्यापि कर्तृ-
कर्मणोरेवान्वयोऽस्तु दृष्टमेव व्याहृतम् २ आश्रयस्य कफलेऽन्वयः कुतः व्यापारे इत्र विनिगमकमाह तत्रेति तङ्यकः फले विक्लित्यादावाश्र-
यस्यान्वयं विशेषणत्वेन द्योतयन्ति शबाद्यास्तु व्यापारे आश्रयान्वयं द्योतयन्तीत्यन्वयः परस्मैपदमात्मनेपदं नियामकमेवोपसर्गप्रयु-
क्तप्रयोगे न चेन्नत् तदप्यसार्वधातुके यक्चिणोर्निषेधस्थले च आदिना कृतिरजोः प्राचां परस्मैपदे च द्योतके विना चिण्भावे कर्मणो-
रित्यनेन विहितः तास्यादिना प्रकरणाद्युपि द्योतकम् कर्तृस्यभावे केषु पश्यति वटः स्वयमेवेत्यादौ तिङादावपि शप् कर्तरि शवि-
ति ३ ॥ क्रमात् मुनात्रयस्तबोधिसत्वादौ व्यभिचारमाशंक्याह । उत्सर्गोऽयं कर्मकर्तृविषया हि विपर्ययात् तस्मात् द्योतितं तेषां द्योतक-
त्वं यथागमम् ४ ॥ ननु धात्वोर्भावनाभिधायकत्वात् तस्याश्च फलनियतत्वात् फलवत्त्वः कर्मत्वात् सर्वे धातवः सकर्मकाः स्युरित्याशङ्क्य सकर्मकत्व-
माह ॥ फलव्यापारयोरेकनिष्ठतायामकर्मकः धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ५ ॥ धातुरित्यनेनान्वयः यत्र भावनाफलभा-
वनाधिकरणं सोऽकर्मकः यत्र भिन्नाधिकरणं स सकर्मकः ननु ह्रदो भवतीत्यादौ ह्रदादेः कर्मसंज्ञापि प्राप्नोति नैष दोषः परत्वात्कर्तृसं-
ज्ञा एकसंज्ञाधिकाराच्च नास्ति समावेशः ।५॥ मीमांसके नयेष्टास्तन्त्रो वैयाकरणा वदन्ति यन्मतं भावनैव नास्तीत्याशयमाह ॥ या

I

फले

कर्तृकर्मणोः

पारोभावनासेवोत्पादनासेवदक्रिया कृञोकर्मकत्वापत्तेर्नेहि यत्नोर्थस्त्याते ६ ॥ एतच्चभट्टवादिसूत्रेकर्मणिद्वितीयेतिसूत्रेचभाष्येकरणोय
जइतिसूत्रेचस्त्रैश्चस्पष्टम् आख्यातस्ययत्नोवाच्योयत्नार्थककरोतिनासमर्थ्याख्यानविवरणादिनिशिरोमणीयंदूषयन्ति कृञइति कृञोय
त्नोर्थोनेष्यते कुतः अकर्मकत्वापत्तेः ६ ॥ स्वसिद्धान्तमाह ॥ किन्त्वाहानमेवातः कर्मवत्स्यायगादपि कर्मकर्तर्ययथात्वनभवेत्तहृशे
रिव ७ ॥ एवेत्यन्वयः अतोहेतोः कर्मवत्कर्मणात्तुल्यक्रियइत्यतिदेशोसतियगादिस्यात्कर्मकर्तरीत्यन्वयः दृशेरिति कर्मणिदर्शनकृत
विशेषान्तुपलम्भेनकर्तृस्थभावकत्वादतिदेशाप्रवृत्त्याभावांशेदृष्टान्तः । ७ ॥ एतदेवप्रपञ्चयति ॥ निर्वर्त्ये च विकार्ये च कर्मवद्भावएवते
नत्वप्राप्येकर्मणीतिसिद्धान्तोहिव्यवस्थितः ८ ॥ निर्वर्त्यादिकर्मस्थक्रियाणांकर्म आप्यं तु कर्तृस्थक्रियाणामित्यर्थः ८ ॥ तस्मात्करोतिर्धा
तोः स्याद्व्याख्यानंनत्वसौतिङ्ग्राम् पक्ववान्कृतवान्पाकंकिंकृतं पक्वमित्यपि ९ किंकार्यं पचतीयं चेत्यादिदृष्टं हि कृत्स्वपि किन्तु क्रियावाचक
त्वविनाभावात्त्वमेवतु ९ ॥ यतः कृञो यत्नोर्थोनेष्यते तस्मात्सोकरोतिर्धातोर्व्याख्यानं न तु तिङ्ग्राम् धातोरेवकरोतिनाविवरणमित्यत्रविनि
गमकमाह पक्ववानिति किंच कृत्तामपिभवन्मतेयत्नएववाच्यः स्यात्तदाश्रयः ननु चैत्रः पक्तामैत्रोगन्तेत्यादावभेदान्वयोपलब्धेर्ना
मार्थयोरभेदः संसर्गइतिव्युत्पत्त्यातत्र कर्त्रर्थ इति चेन्न हि पचतिचैत्रः पचति कल्पं मैत्रः चैत्राभिन्नकर्तृकोवर्तमानः पाकः मैत्राभिन्नकर्तृको
वर्तमानईषदसमाप्तइत्यादावप्यभेदसंसर्गोपलम्भात्कल्पादौचनामार्थत्वात्तत्वम् किंच युष्मद्युपपदे समानाधिकरणेमध्यमइत्यादिसूत्र
षद्व्यवस्थानापत्तेः सामानाधिकरण्याभावात् आख्यातार्थस्य संख्यारूपस्यान्वयमादायमेवसामानाधिकरण्यमितिचेन्न लक्षणप्रसंगात्
अनभिहितत्वाच्चकर्तृस्तृतीयापत्तिः ननु नभिहितसंख्याकत्वमेवतस्यार्थ इति चेन्न कृत्तद्धितसमासैः संख्यानभिधानात् न च कृति
मात्रशक्तत्वेलाघवमितिशंक्यम् व्यापारस्य धातोर्लभ्यमानाश्रयमात्रशक्तत्वेनतोपिलाघवात् शक्तिः कारकमितिसप्तमीपक्षेप्यो कारक
मध्येइतिसूत्रेकृत्यदेलाघवतरत्वात् पचतीत्यादौयत्नः पच्यतइत्यादावाश्रयइतिविषयेगौरवाच्च अस्मन्मते त्वाश्रयत्वमात्रमवच्छेदकं तद्वा
त्वरूपोपाधिः आश्रयमात्रार्थादिना कविमतेनयः कश्चिद्व्यापारेरुक्तमेव तरेवं कृतीशक्यो नत्वयत्नइतिस्थितम् इत्यथेमूलेस्फुटी
भविष्यति ९ मीमांसकंप्रत्याह किंच्चेति ततश्चलङादिलाभः स्यात् किंच करणं पक्ववानित्यादौ कृत्यपि हत्वाद्यादि नैयायिकोक्तदो
षापत्तया ॥ १० ॥ ननु गणपठितत्वमेव धातुत्वमित्याशंक्याह ॥ सर्वनामाव्ययादीनां घावादीनां प्रसंगतः नहितत्याग मात्रेणयुक्त
मित्याकरेस्फुटम् ११ ॥ नचगणपाठाद्यर्थनिर्देशोनियामकइतिवाच्यम् तस्य भीमसेनादिभिर्निः क्षिप्तत्वात् अर्थान्तरेधातुत्वालाभाच्च गणे
यतीत्यादौ भावनायस्यानवाख्यानार्थत्वापत्तिश्च धात्वर्थः ननु एवं भावनाविशेषकोनोधेनस्यादिति चेन्न प्रकृत्यर्थविशेषणं प्रत्ययार्थो
विशेष्य इत्यस्योत्सर्गत्वात् पाचिकेत्यादिस्त्रीप्रत्ययादिस्थले तथाप्यवश्यं स्वरीकर्तव्यत्वाच्च आकरे महाभाष्ये भट्टवादिसूत्रेशाप्तात्राप्तविभा

वै. भू.
टी.
२

लोपन्यासः प्रसंगादन्योन्याश्रयं परिहरति व्यापारसन्तानः क्रिया तद्वाचको धातुरित्यर्थः ॥ ११ । यद्वा मीमांसको वैयाकरणं प्रति दोषमा-
ह । धात्वर्थत्वं क्रियात्वं चेद्वाच्यं तच्च क्रियार्थता अन्योन्यसंश्रयः स्पष्टस्तस्मादलक्षणं यथाकरम् १२ । एवं चेत्तं ब्रूयामन्योन्याश्रयः स्पष्ट-
स्तस्मादिति व्याख्यातार्थ एव क्रियेत्यध्याहारः वैयाकरणो ब्रूयादिति अस्तीति व्यापारसन्तानः क्रिया तद्वाचको धातुरिति महाभाष्ये भूवादि-
सूत्रे प्रमाणोपन्यासः १२ ॥ ननु धातोः क्रियावाचकत्वे भवतीत्यादौ क्रियानुपलम्भाद्भ्वादीनां धातुत्वं न स्यादित्याशङ्क्याह ॥ अस्त्यादाव-
पि धर्म्यंशे भावोऽस्त्येव हि भावना अन्यत्राशेषभावात्तु स्पष्टा तथा न प्रकाशते १३ ॥ भवत्यादावस्त्यादौ च भूधातोः स्थिरत्वमर्थस्ता-
त् तत्र भवः धात्वर्थानां भवनत्वेन जातरतिभेदेन निर्देशात् सा भावना यथा घटमुत्पादयति ओदनं पचतीत्यादौ स्पष्टा प्रतीयते एवं भ-
दो भवतीत्यादौ न भावनायाः फलस्य चैकाधिकरणत्वात् तत्र भवति स्वस्वरूपं लभत इत्याद्यर्थस्य ज्ञानादस्तिभावनाभानमित्यर्थः १३ ॥
अध्याहारादीनां भावना मिथ्या यदि तेः साधुत्वमेव स्यादित्याह ॥ भेद्यभेदकसंबन्धोपाधिभेदनिबन्धनम् साधुत्वं तदभावेऽपि बोधो नेह निवा-
र्यते १४ ॥ साधुत्वमित्यन्तेनान्वयः यस्मिन्विशेष्ये यादृशविशेषणान्विते यदुपाधिपुरस्कारेण यादृगानुपूर्वीसत्त्वकारान्यतमेन साधु-
त्वमध्यायि स स्थले तत्र साधुरन्यत्रासाधुरेव अत एव दध्यमथो ... साधुर्दरिद्रः साधुः तालव्यमध्यश्चदरिद्रशब्दो यथा धा-
तवः क्रियायां साधवः आख्याताः कर्तृकर्मभावेषु यत्ताद्यर्थे तेषां हि बोधो स्तं असाधुत्वं तस्मादेव तत्रस्था साधुशब्दप्रयोगनिब-
न्धनं पापं नैयायिकादीनां स्यादेवेत्यर्थः १५ ॥ इति वनमालिमिश्रविरचितायां वैयाकरणमतोन्मज्जनटीकायां [illegible]विचारोल्लासः प्रथमः १
क्रियाप्रसंगे एतेषां क्रियान्वयो नैयायिकोक्तः पश्चात्तु गर्हितस्त्याह ॥ सम्बोधनान्तेऽप्यत्रोऽर्थाः कारकं प्रथमो वतिः धातुसंबन्धाधिकार-
निषाद्रमसमस्तनञ् १५ तथा यस्य च भावेन षष्ठी चेत्यादिसूत्रद्वयम् साधुत्वमुक्तस्यास्य क्रियायैवावधार्यताम् १६ ॥ संबोधनान्तस्य क्रि-
यान्वयः स्पष्टसिद्धोऽयमर्थः तथाहि संबोधनविभक्तेरन्वयविषयकत्वाद्विधेयसाकाङ्क्षत्वाद्विधेयस्य च क्रियारूपत्वादिति भावः ननु हे
देवदत्त त्वं सुन्दरोऽसीत्यादौ गुणोऽपि विधेयः सत्यम् संभवत्यामेकवाक्यतायां वाक्यभेदे गौरवात् यद्वा कात्यायनवचनात्संबोधनान्तस्य क्रि-
यान्वयः तथा च समर्थसूत्रे भगवता कात्यायनेन वाक्यलक्षणमव्ययमेति वाक्यविशेषणस्य लौकिकवाक्यस्य निरासाय परिभाषित-
म् एकतिङ् तत्र भाष्यकारा उदाजह्रुः ब्रूहि ब्रूहि देवदत्तेति एकतिङिति अस्य प्रयोजनम् समानवाक्ये निघातयुष्मदस्मदादेशा नानावाक्ये
मा भूवन्निघाता इत्यरूतिकात्यायनो भगवान्देवो ब्रूहि ब्रूहीति प्रतीकमादाय ब्रूहि ब्रूहि देवदत्तेत्यत्र वाक्यत्वात्साम त्रिनिनिघातः सिध्यतीति
कैयटेनाव्याख्यौ उक्तं च भगवता हरिणा संबोधनपदं यच्च क्रियायास्तद्विशेषणम् व्रजानि देवदत्तेति निघातोऽत्र तथा सतीति इदं तद्विधे-
यम् निघातस्थले क्रियाविशेषणम् यत्र निघातो नास्ति तत्रानियमः एकं विशेषकं वाक्यमिति भाष्यकारैर्वाक्यलक्षणस्य कृतत्वात्

दरिद्रः साधुः
अद्धे साधुः

२

कलोऽर्थः क्रियाभूयस्त्वेनैतेषां विधानात् कारकम् कारकेऽस्मधिकृत्य तेषां प्रक्रान्तत्वात् कारके क्रियायामिति भाष्यकारैर्व्याख्यात
त्वात् प्रथमोवृत्तिः तेन तत्त्वं क्रियाचेहेतिरित्यत्र यत्नेन त्वसा क्रियाचेदि सुकृतत्वात् धातुसंबन्धे प्रत्यया इत्यधिकृत्य विहितत्वात् वदनू
ददृश्वा सोमयाजी अस्य पुत्रो भविता पुनः प्रत्ययग्रहणाद्धात्वधिकारविहितानामपि प्रत्ययानां धातुसंबन्धे सति साधुत्वम् गोमान्भवि
ष्यति ननु प्रत्याख्यानेऽस्मिन् अन्वर्थो प्रत्याख्यातत्वान्न स्वर्थस्य लक्षणया साधितत्वाद्दोषः असमस्तेन नञ् तथा च सूत्रं नपुंसकस्ये
ति सूत्रे वार्त्तिकम् असमर्थसमासश्चायमिति तस्य व्याख्यानभाष्यं न हि नञ्समकेन सामर्थ्यम् केन तर्हि भवतिना श्रद्धं च परैरप्यङ्गीकर्त
व्यम् प्रसज्यपर्युदासयोर्भेदार्थम् १५। यस्य भावेति भावेनेति वचनात् भावस्य च क्रियात्मकत्वात् अपरिस्पन्दसाधनसाध्यो भावः स
परिस्पन्दसाधनसाध्या क्रियेति परिभाषामात्रं तच्चेह सूत्रे नाश्रीयते षष्ठी चेतीति षष्ठी चेत्येकदेशेन षष्ठी चानादरे इति सूत्रं लक्ष्यते ए
वं स्थिते एतदभ्यन्तमस्याः क्रिययापि सहान्वयं कुर्वन् शाब्दबोधसामग्र्याः सद्भावाद्भवत्येव क्रियां विनाप्यन्वयः भूतले घटः सत्ताऽधि
करणस्य प्रमाणादिना सद्भे पर्वतो वह्निमान्धूमान्महानसवद्गवित्वमर्हतीति क्रियामध्याहरन्तो वेदान्तिनश्च पलभमानानां नैयायि
कानां व्याकरणवचनमतिक्रामन्तामसाधुत्वं स्यादितिरामिमाह ॥ यदि पक्षेऽपि चत्वर्थः कारकं च मिश्रादि हेतुः अन्वेति स्याज्यतां तर्हि च
तुर्थ्याम् स्वहि कल्पना १६ ॥ पक्षे पर्वतादौ चतुर्थ्यास्वहस्वहि कल्पना व्यज्यतामित्यन्वयः पृष्ठभारश्लिच्चतुर्थ्यांश्रुतायां स्वहयतीत्यवाधि
क्रियते स्वर्द्धपर्याये धात्वन्तरेऽध्याक्रियमाणे चतुर्थ्याः साधुत्वमिति किमर्थं तेषां भ्रान्तानामाग्रह इत्यर्थः । १७ । तद्धितानामिश्रादीनां क
र्त्रोहो विधानात् क्रियायै वात्वयस्यात् ॥ अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः क्रियासंबध्यते तद्वत् तदर्थादिषु स्थिता १८ ॥
न विविसाग्रहो ग्रहणं यस्याः साऽविग्रहा गतः त्यादावविग्रहापि क्रिया ग्रामादिकर्मभिर्यथा संबध्यते तद्वत् तदर्थादिष्वविग्रहैव क्रिया
सम्बध्यत इत्यन्वयः ननु वृत्तिः स्वस्मिन्नान्त्ये एकार्थीभावः पासदकवट विभागापन्नः नास्ति तत्र प्रातिस्विकरूपेण पदपदार्थग्रहणं तत्कथं
गतादिस्थले पदार्थैकदेशभूतायाः क्रियाया ग्रामादिभिः संबन्धः द्वितीयाश्रितातीतकर्तृकरणे कृता बहुलमित्यादिवचनसामर्थ्याद्
दोषः कृतस्वीकृतमित्यस्याय मर्थः कटफलिकाभूता यानिश्चिता निस्तन्कर्मा । १८ । कृदाख्यातयोः क्रियाविशेषमाह ॥ आख्यातशब्दे
भागाभ्यां साध्यसाधनवर्त्तिता प्रकल्पिता यथाशास्त्रे सबन्नादिषु पिक्रमः । १९ । आख्यातशब्दे पचपचगोधावतीत्यादौ भागाभ्यां तिङन्ता
भ्यां न तु प्रकृतिप्रत्ययभागाभ्याम् पकम्गस्य तत्र कर्तृकवर्त्तमानशीघ्रगतिविषयकं प्रेरणे विषयभूतं दर्शनमिति बोधः पचपभागेन सा
ध्यवर्त्तिता धावतिभागेन साधनवर्त्तिता शास्त्रइत्यनेनान्वयः नन्वेवमाख्यातेऽसत्त्वावस्था क्रिया प्रतीयत इति सिद्धान्तव्याकोपइति चेत् न
आख्यातक्रियापि क्रियान्तरं प्रति कर्तृकर्मतापन्नत्वेऽवशाच्छक्तिस्वाभाव्यादन्वेति स्वभावादेवत्वा तत्राख्यातक्रियायां कर्तृकर्मभूतायां न सं

वै·भू· टी २

३

त्वान्वयः इति निर्णीतं सत्स्वरूपसत्त्वेऽभ्यन्तरादिसत्त्वेऽपि च तत्रादिषु भागाभ्यां प्रकृतिप्रत्ययभागाभ्याम् ।१९। एतदेव विपरीतव्याख्यातृन्मीमांसकान्निर-
स्यन्नाह । साध्यत्वेन क्रिया तत्र धात्वर्थतया निबध्यते । सिद्धभावस्तु यस्तस्याः सत्त्वनादिनिबन्धनः ।२०। तत्रकृति निरूपितमेतज्ज्ञाप्यकोटि सार्व-
धातुकेऽयगिति सूत्रे भाष्ये यावत् एका क्रिया एकत्वपरिभाषितं भेदानवच्छेदसाधनं पम् भाष्ये तेनोपस्थापिताः क्रियायाः सिद्धत्वे भेदाभावात्क-
ल्पनात् साधनभेदात् क्रियाभेदे वा सत्त्वैकत्वसावकाशकथनात् अन्यत्र पचतितो हि त्वमहं च युवयोरेकैका क्रियेति व्यवहारः । द्रव्यधर्माणां लि-
ङ्गसंख्याकारकसत्त्वानामयस्य परामर्शत्वादीनामन्वयात् तथा तत्र उपस्थाप्यत्वमिष्यते ॥ ननु एवं क्रियायाः अपि पदत्वमात्रे तु विधीयमान
त्वमनादिः तत्र न्नेऽपि परेन स्यादक्रियात्वात् अथ तत्राग्र उपस्थाप्य क्रियामादाय प्रत्ययस्तु सनादिः तर्हि पाकः पाकस्त्वं सत्त्वाकरति ।
होपाधेर्यत्र प्रयुक्तत्वात्स्वरूपस्य तत्र हि द्विवचनम् भवति स च पश्य पाकादौ तस्मादेकत्वस्यरूपात् प्रत्योच्यते क्रियाभ्यावृत्तिगणने तस्मात् क्रियायाः हरणं
सर्वं तस्मात् एवं व्यावृत्तिः संभवति स्वरूपेणैतत्त्वं क्रियाविशेषणत्वाभावात् तेन साध्यत्वभावे वेहक्रियोपादीयते ननु एवमभिधानेऽपि
स्थाप्यसाध्यस्वरूपक्रियामाश्रित्य कृत्वा नकृत्वसजादिः अधिकयत्नाश्रयणे सत्त्वे पर्यायेऽत्र संभवति यद्येवं तर्हि द्विर्वचनमित्यादिप्रयोगा-
नुपपत्तिरिति चेत् तत्रैकस्य सकृद्वेति सूत्रे स्थितत्वात् परिजहार कैयटः द्विर्वचनेच्छीतिज्ञापकाद्धि राद्विरिति द्विः प्रयोगो द्विर्वचनमित्यादि सिद्धिः ।
ज्ञापकाश्रयणमप्युद्यमतिप्रसङ्गः सकृत्वाकत्वादेर्भोक्तृपाकत्वादौ ज्ञापकानुपलम्भेऽपि तस्मादभिधानानभिधाने एव शरणमित्येतत्त-
त्त्वं हृदि कृत्वाऽऽह गुरवः ।२१। कृत्वोर्थाः क्वाऽवयुक्तत्वस्यैरिति चेत् स्निग्धि कश्चित् अतिप्रसङ्गो नोद्धाव्योऽभिधानस्वभावमाश्रयादिति २१ । कदा-
दयो यथा धात्वर्थक्रियायां निमित्तीकृत्य जायन्ते तथा कृत्वोर्था अपीति चेदिष्टापत्तिः तर्हि सकृत्पाकः स्यादिष्याम्ये चास्य शङ्कामाह अनीति
यत्रार्थाभिधाने कृत्वोर्थाः समर्थास्तत्रेष्वेव यत्र न तत्र नेत्यन्वयः २२ । इति श्रीवनमालिमिश्रकृतायां वैयाकरणमतोन्मज्जनटीकायां क्रि-
योल्लासो द्वितीयः ॥ २ ॥ सुपामर्थान्निरूपयति ॥ आश्रयोऽवधिरुद्देश्यः संबन्धः शक्तिरेव वा यथायथं विभक्त्यर्थाः सुपां कर्मेति भाषितः २३
॥ द्वितीयातृतीयासप्तमीनामाश्रयः तथा हि कर्मणि द्वितीया तत्र कर्त्रीप्सिततमम् क्रियाजन्यफलाश्रयत्वमिति यावत् कर्तृकरणयोस्तृ-
तीयायास्त्वाश्रयव्यापारो तत्र व्यापाराश्रये विशेषः यथा वटेनाहर वटनिष्ठव्यापारजन्यमानयनम् सप्तम्याः सकर्मकधातुस्थले
कर्तृद्वारा सकर्मकधातुस्थले च कर्तृकर्मद्वारा क्रियाश्रयोऽधिकरणम् तत्राश्रयत्वमात्रेण कर्तृकर्मकरणानामाधारसंज्ञा या प्राप्ता याम्
कर्तृकर्मसंज्ञाभ्यां परत्वाद्बाधिता कर्तृसंज्ञया च कर्मसंज्ञा करणसंज्ञा पूर्वविप्रतिषेधात् अधिकरणकर्मकर्तृसंज्ञा बाध्यते तमग्रहणात् समावेशस्तु
न एकसंज्ञाधिकारात् ननु कारकाधिकारे गौणमुख्यन्यायानवतारस्य तत्पदार्थत्वमग्रहणम् तत्फलं तु द्विपरिकल्पितविभागेऽपा-
दाने सिद्धिरिति चेत् सत्यम् कारकाधिकारस्साधकत्वे सिद्धे पुनः साधकग्रहणादितिग्रहणम् ननु तरस्यस्पर्शणोतीयमत्रावकथितस्वेऽपरि-

अधिकरणादिसंज्ञाबाधने ॥

क्रियाप्रस्तावः

३

रिगणानस्योररीकृतत्वाच्चुरादेः करणसंज्ञा वाऽप्राप्यतदिति चेत् सत्यम् तदर्थं सदिद्दापि विषयलाभायोपयुज्यत इत्यदोषः अपवाद
त्वाद्वा तदेवं कारके क्रियारूपे यः स्वतन्त्रः धातुत्वेन धात्वर्थोपात्तव्यापाराश्रयः स कर्त्तेति सूत्रार्थः तदुक्तं हरिणा धातुनोक्तक्रिये नित्यं का
रके कर्तृतेष्यत इति पचित्वादिना धात्वर्थोपात्तस्य विक्लित्यादेराश्रयभूते कर्मणीप्सिततमं परिशेषात्कर्मैव न करणादि पचित्वादिनो
पात्तार्थस्यानाश्रयणात् ननु कर्त्तुरीप्सिततमं कर्मेत्येतावत्सूत्रे तत्र कस्य परस्मैदं निर्वचनम् उच्यते अन्तरङ्गत्वाद्धात्वर्थोपादानात्
नचाधिकरणादावन्तरङ्गो हेत्वाश्रयः नमस्यहरणं ना सर्वग्राहकादिहैव विवक्षितत्वात् सम्पिदात तद्वेदे तेऽपरया कर्मसंज्ञयानिर
वकाशया चैकसंज्ञाधिकारात्समावेशाभावाददोषः एवं स्थिते करणाधिकरणसंज्ञयोर्युगपत्प्राप्तौ प्रकर्षाश्रयणाद्धि विक्ल वि
षयलाभः ननु छेदनमिच्छति शयनमिच्छति अत्र छेदनशयनाभ्यां कुठारं शय्यां चेच्छति क्रोनात् संप्रदानत्वम् परत्वापवादत्वात्तमव
ग्रहणात्करणाधिकरणसंज्ञयोरदोषः कुठारस्यानुद्देश्यत्वात्तेन हि क्रियोद्देश्या ध्रुवदानीययोर्न करणादिसंज्ञा निरवकाशत्वादपादान
संप्रदानसंज्ञयोः करणसंज्ञायां तमब्ग्रहणाद्धि विक्ल विषयलाभाच्च न स्मात्सूत्रात्तरैरेवायमर्थो लभ्यते तदयमत्रसारः व्यापारसन्ना
नाश्रयः कर्त्ता फलाश्रयं कर्म तत्रापत्त्वभेदेन विभक्तिसन्निपाते द्वितीयातृतीययोः स्थलविशेषषष्ठीबाधाद्धरितार्थत्वात् प्रकृतिमात्रस्यव
प्रयोगेऽप्यस्वचनाद्द्वितीया तृतीयाद्वितीये समप्रकृतिस्थे कर्तृकर्मत्वे क्रियाप्रत्याहतः कर्तृकर्मणोराश्रयमत्तयोस्तिङ्संतिते नतिङादिन्यस्थे
कर्तृकर्मत्वे स्वप्रकृतिमन्तयात्वर्थे प्रसज्यतेइतिभेदः अतएवाश्रयेनाधमानानां तृतीयाद्वितीयासप्तमीनां पर्यायत्वं न भवति याज्ञादेस्ताम
र्थ्यात्सकत्वाद्धि शेषावसायः पर्यायत्वं तु शक्यतावच्छेदकैकत्वे सति शक्यतावच्छेदकभेदः एतद्विपरीतत्वं नानार्थत्वम् शाब्दबोधस्त्वस्य
यस्वप्रकारकाएव तथाहि देवदत्तः परशुना काष्ठं छिनत्ति बहुकाष्ठाश्रयिकाया छिदानतस्तु कूलपकरे वदत्तनिष्ठैकपरस्तु व्यापारसा
ध्योवर्त्तमानो व्यापारः कर्तृकर्मसंज्ञाशास्त्रव्यवहारनिर्वाहाय परिक्षुभादिवत् ननु तासां शाब्दे बोधे भानम् अव्युत्पन्नदेश्यसंबन्धाः पंचमी चतुर्थी
षष्ठीनामार्थाः सत्रारूपएव लाघवमाह पाणिनिरिति षसामपी तिशेषः तत्रशक्तौ कार्यासंभवा तदाश्रयेलक्षणा शाब्दबोधस्तुपदस्थाप्यारपित
त्वः तथाहि देवदत्तेन पञ्चम्यगौर्हस्तेन बद्धा स्नानपंगेशेऽङ्गायां दीयते प्रत्र संबन्धिनीयेकागोस्तन्निष्ठायत्याग सदन्तकूलोद्धा स्तत्ता हेशको
गेहावधिको हस्तेदेवदत्तनिष्ठो हस्तनिष्ठव्यापारसाध्योवर्त्तमानो व्यापारः यथायथमिति विभक्तिविधाने चत्वारः पक्षाः स्वौजसित्येन
द्विजादाकानयाविधायकम् कर्मणि द्वितीयाद्येकयोर्द्विवचनैकवचनेरलासीनो नियामकत्वम् तत्राप्यर्थनियमः कर्मणि द्वितीयैव
द्व्येकयोर्द्विवचनैकवचने एवैवमाकारक इत्यप्रत्ययनियमः द्वितीयाकर्मण्येव द्विवचनैकवचने द्व्येकयोरेवेत्याकारकः तत्रार्थनिय
मपक्षेऽव्ययेभ्यः समेव प्रत्ययनियमोपि द्वेधा सामान्यतो वानान्यत्र कुत्रापीत्येवम् सजातीयापेक्षो वा नान्यत्र कारके संख्याश्रये चे
त्येवम् आद्येऽव्ययेभ्यो विभक्त्यलाभः अस्मिन्पक्षेऽव्ययाद्वापि सुपकाराणां लाभः भावकर्मणोरिति वचनाच्च तिङां भावेतद्धितस्यासर्व

वै॰भू॰
टी॰
५

विभक्तिरिति सूत्रोक्तेनोत्सर्गपक्षेणाम् अयं तत्र परमार्थः उत्सर्गपक्ष एव अन्यथाख्यानेऽपि त्वस्मात्प्रयोगविधायकत्वेऽभावे सर्ववचनश्रव-
णम् अथ नियमेऽपि भावकर्मणोरादेरेव लब्धत्वेन योर्द्विवचनैकवचनेऽप्येव एवं प्रत्ययनियमेऽपि सामान्यनियमपक्षे सर्ववचनश्रवणम् नत्र-
निवृत्त्यभेदाख्याने क्रियाप्रतीतिरिति सिद्धान्तव्याघातः किं तर्हि क्रमः यद्यपि निवृत्तभेदायामपि वचनाद्द्विबहुत्वे एकवचनमप्यस्यैव स्या-
त् उत्सर्गस्यापीदं तत्त्वम् एकवचनमिति सूत्रं कर्तव्यम् ततो द्विबहोर्द्विवचनबहुवचने भावप्रधानो निर्देशः द्विबहुशब्दयोर्गुणपरत्वा-
द्वा जसिसमस्य भिन्नवाक्यतया विधायकत्वेऽर्थनियमे च सजातीयापेक्षया प्रत्ययनियमेऽपि वचनान्तरनिवृत्त्यर्थम् सामान्यपक्षे सर्ववि-
भक्त्यर्थम् तत्रापि सर्वासामेकवचनम् प्रथमायाएव वा साधुत्वार्थस्यास्य फलितत्वात्प्रथमैकवचनेनैव तदुपपत्तेः प्रथमायाएवेति पक्षेना-
तायाम् सजातीयापेक्षप्रत्ययनियमे च एकवचनमिदमपि न सूत्रपि तद्व्यम् परिशेषादेव सिद्धेः न च वचनान्तरप्रसंगः वाक्यस्यान्यत्रसावका-
शत्वात्कृते च साधुत्वमात्रस्य प्रयोजनत्वात्तस्य प्रथमैकवचनेनैवोपपत्तेः तदेवमव्ययेभ्यः सुपां भावे लिङ्ग भिन्नवाक्यतापक्षे सर्ववचनानि
अर्थनियमेऽप्येवम् सजातीयापेक्षप्रत्ययनियमेऽपि एकवचनमित्यस्य वाचनिकत्वपक्षे सुपां तिङां चैकैकं वचनम् अवाचनिकत्वपक्षे वाच-
निकत्वपक्षे च साधुत्वार्थत्वादेकवचनमेव प्रथमायानान्यासामेकवचनं प्रयोजनान्तराभावात् संबोधनप्रथमायास्तु संबोधनमः अ-
त्र तत्संख्यामात्रमव्ययादिभ्यः साधुत्वमात्रम् आनन्त्यप्रतिप्रमाणमाङ्कुः सुपां कर्मेति भाष्यतश्चेति एतच्च यद्यपि वार्त्तिके बहुषु बहुवचन-
मित्यत्र सार्वधातुके यगिति सूत्रे च तथापि व्याख्येयव्याख्यानयोरभेदाद्भाष्यतस्तु क्रमम् २२ ॥ इति वैयाकरणमतोन्मज्जनटीकायां सुबुल्लास-
स्तृतीयः ॥ ३ ॥ अथ कर्मप्रत्ययनिरूपणप्रसङ्गादर्थं निरूपयति ॥ एकं द्विकं त्रिकं चाथ चतुष्कं पंचकं तथा नामार्था इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः
२३ ॥ एकं जातिः द्विकं जातिव्यक्ती त्रिकं सलिङ्गं ते चतुष्कं ससंख्यास्ते पञ्चकं सकारकास्ते तत्रैवं सर्वस्य प्रातिपदिकार्थत्वे उत्तरोत्तरं
यथायथं विभक्त्यर्थो विनाद्यम् नन्वाद्यपक्षे सर्वशब्दानां लिङ्गाः स्युरिति चेन् न लिङ्गानुशासनस्य तात्पर्यग्राहकत्वात् एतच्च
समभिव्याहृतविभक्तिरेतदेव लिङ्गं वक्तुं समर्था कस्यचिच्छब्दस्य समभिव्याहारात् पुंस्त्वमेव कस्यचित्स्त्रीत्वमेव कस्यचिन्नपुंसकत्वमेव
कस्यचिन्मिश्रत्वे कस्यचित्स्त्रीनपुंसकत्वे पुंलिङ्गः शब्दस्याद्यभेदस्तत्पचारात् पुमांल्लिङ्गमस्यादिति वा पुंस्त्रीनपुंसकानि च स्वरूपस्त्र-
प्रातिपदिकस्त्रियामिति सूत्रोक्तानि परिभाषितानि सत्त्वरजस्तमसां हि द्वासमाम्यरूपाणि तानि च केवलान्वयीनि अयं परार्थः र-
यं इति इदं वस्त्विति सर्वत्रैव व्यवहारात् न तु लौकिकानि अव्याप्त्यतिव्याप्तिदोषदुष्टत्वात् न च वंशदमात्रस्य त्रैलिङ्ग्यस्यादिति वाच्यम्
स्वभावात्कस्यचिच्छब्दः किंचिदेव लिङ्गं प्रत्याययितुं समर्थः यथा हरशब्दो हरत्वप्रकारकव्यक्तिविशेष्यकामेव प्रतीतिं जनयति न तु प्र-
कारान्तरप्रकारकविशेष्यान्तरविशेष्यकाम् अभिधानेऽप्येतान्येव लिङ्गान्यादाय व्यवस्था न तु लौकिकानि तस्माद्भूसोनः पुंसिद्धान्ते ५
नास्त्रियामित्यादिशास्त्रीयविधिनिषेधेऽप्येतान्येव निमित्तानि ननु पञ्जनायजेते स्यादौ पुंस्त्वं विवक्षितम् नादेशादिस्याद्दोवि विवक्षितेऽपिशा

स्त्रीपेऽस्त्वेपशुस्त्रिया यागप्रसङ्गः इति चेन्न लौकिकान्येव लिङ्गानि शास्त्रप्रवृत्तिहेतवः तदस्तत्वीतदमित्यादौ त्वारोपाद्युपपत्तिरि
त्याहुः परिवृत्तो रथः नक्षत्रेण युक्तः कालः एवं दाते पि संस्कृते भक्ष्याः इवं साम तथाह्लादाः पुंसीत्यादिनिर्दिष्टशास्त्रारोपेमानम् अ
त्रेदं तत्त्वम् यागे स्त्रीपलिङ्गान्येव यागाद्यव्यवहारहेतवः पशुनेत्यादौ तु छागो वा मन्त्रवर्णादिति न्यायेन मन्त्रे च छागस्य तिश्रवणात्स्त्रत्व
नियमोऽध्यवसेयः छागशब्दस्य लौकिकपुंस्त्वविशिष्टपरत्वे शास्त्रीयपुंस्त्वेशङ्कः अन्यथा पशुनेत्युक्ते पशुत्वान्तरं छागव्यतिरिक्तमप्यु
पादीत भ्रान्त्यान्यतिप्रमाणमाहुः शास्त्रइति समपसत्त्वादौ २३ ॥ स्थलविशेषे दोहा प्रातिपदिकार्थरस्मार ॥ शब्दोपि यदि भेदे
न विवक्षास्यान्नदा न तथा नो चेद्धृत्वादिभिः सिद्धोप्यसावर्थोवभासते २४ ॥ अर्थान्तरे तु कार्यरूपान्तु द्वादन्तु करणशब्दस्य यदि भेदेन विवक्षा तर्हि
अनुकरणशब्दोपि तथा प्रातिपदिकार्थ इत्यन्वयः नो चेदिति यदि न भेदविवक्षा तदा शब्दोर्थे दशादौ प्रातिपदिकार्थे अन्येन द्वियेणपाय
वभासते २४ ॥ अत एव गविमाहभूसत्तायामिति हृशास्त्र न प्रातिपदिकं नापि पदं साधुत्वं तस्य तत् २५ ॥ यतः कारणान्नभेदविवक्षातो
र्थवत्त्वाभावात्प्रातिपदिकत्वाल्लाभ्यां हि भक्त्युत्पत्तेरगवित्यपि त्यन्वयो गोरिति नभूसत्तायां भूरिति नरेदृशां विभक्तिरहितम् पदङ्क्तं भवति ॥
अत्र करणे द्वितीयोगतिः अनुकार्यः शब्दो भिन्नः अनुकरणो भिन्नः अनुकरणस्यानुकार्येणार्थवानिति अनुकार्यानुकरणयोरभेदइ
तिवा आद्यायामनुकरणे हि भक्तिश्रवणम् द्वितीयायां तु न पदेकवचसाक्षोहत्युक्तिः साध्विति प्रथमप्रयोक्तारं प्रत्येव द्वाप्रातिपदिक
धातोरित्यादिशास्त्राणां प्रवर्तनात् यावदर्थे च स्थणयकिमपि शास्त्रं प्राप्नोत्येतन्मध्ये शास्त्राकरणे प्रमाणाभावादत एव प्रयत्नेनप्रयो
क्तव्यम् अत एवापदं न प्रयुञ्जीतेत्यत्र द्वौ विधायापरिनिष्ठितं न प्रयुञ्जीतेत्यर्थः अनुकर्तुस्तु न शास्त्रप्रवृत्तिरावश्यकी अनुकरणत्वादेव शास्त्र
प्रवृत्तेस्तदानुपूर्वीभङ्गानुकरणत्वमेव भज्येत किं चार्थवत्त्वाभावाच्छास्त्रप्रवृत्तिरेव न अपरिनिष्ठितं न प्रयुञ्जीतेति निषेधोऽप्यत एव नावत
रति नैयायिकादीनां गवित्यमादेत्यादिशब्दानामसाधुत्वं स्यात् इत्याह स्थितसदृशाद्बोधे भानम् इति शक्तिलक्षणान्यतर
समांचास्मामन्यतरस्यामर्थवत्त्वात्साधुत्वमितिः भूसत्तायामित्यादौ छान्दसत्वमस्त्वाऊशकाशावलम्बनेन तद्भविष्यमगादित्यादौ ऽप
कालेवक्तुमिति भावः न च सिद्धान्ते प्रत्यक्षाद्युपस्थितसदृशाद्बोधविषयत्वेऽतिप्रसङ्गः भवतामपि तुल्यत्वात् तादृशीदृष्टायत्ति
रिति चेत् ममाप्येवम् ॥ इति श्रीवनमालिविरचितायां वैयाकरणमतोन्मज्जिकायां प्रातिपदिकार्थोल्लासस्तुर्यः ४॥
समासान्निरूपयति ॥ सुपांसुपा तिङा नाम्ना धातुनाथ तिङां तिङा सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः २६ ॥ समस्य
मानानि सुबन्तान्येव तिङा नाम्ना धातुना सुपा मिति प्रत्येकं संबध्यते एवं परं सुबन्तमेवोत्तरं त्वेतदन्यतमम् तथा च वार्त्तिक
म् गतिमतोदात्तवता तिङापि समासः प्रजयति अनुव्यचलत् कुम्भकारः वस्त्रक्रीती उत्तरपदं नामैव न सुबन्तं नापि तिङन्तम्।

वै. भू.
टी.
५

नन्वुच्यते गतिकारकोपपदानां कृद्भिः सह सुबुत्पत्तेः प्राक् समासः इत्ययं च परिभाषेयं पदमिति ङिन्तिङ्ग्रहणेन ज्ञापिता पूर्वदले उत्तरदले
उभयत्रैवासुबुत्पत्तेरितिपदत्रयम् उत्तरदले सुबुत्पत्तेः प्राक् समास इति तत्त्वे नत्वेनौ चर्मक्रीतीत्यादौ नलोपाद्यसिद्धेः धातुना उत्तरप
देधातुमात्रं न सुबन्तं नापि तिङन्तम् आयतस्तूः कटप्रूः तथा च वार्तिकम् वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च अत एव निर्देशादाय
तकटप्रुवोः सुबुत्पत्तेः धातुमात्राभ्यां समासः तथा च कैयटः अवदातं पदमेकं वर्जयित्वा इति समासौ अव्ययेतिप्रतीकमादाय निपातानां न
ज्ञो धातुना समास इति ननु धातुभ्यां क्विपं कृत्वा प्रातिपदिकत्वात् सुबन्तत्वेनैव समास इति चेत् न विशिष्टस्य कृत्त्वाभावात् प्रातिपदिकत्वाभावा
द्विशिष्टं सुबन्तं पदं न स्यात् समासस्य कृत्प्रातिपदिकत्वाद् विषमति विशिष्टं पदमिति चेत् न फलस्योक्तत्वात् इत्याह प्रयासः अव्ययीभावत्र अव्ययेः प्र
थमतत्पुरुषे लाभाद्विधायकाभावाच्च तिङा तिङा समस्यमानानि तिङन्तान्येव पिबत खादत अश्नीत पिबत पचत भृज्जत खादत मोदत
त्यादि तथा च मयूरव्यंसकादिगणे पठ्यते आख्यातमाख्यातेन क्रियासातत्ये सुबन्तेनेति च तिङामिमनुषज्यते सर्वपदं तिङन्तमेवोत्तरं त
सुबन्तम् जहि जोडम् इत्यादि उज्जहि जोडम् इत्यादि तथा च सूत्रम् मयूरव्यंसकादयश्च गणे जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति
अन्यार्थे च अस्ति क्षीरा अव्ययवार्तिकम् अस्तिक्षीरा इत्यत्र तिङ्नाम धातुभिः सुबन्तस्य पूर्वपदस्य समासः तिङन्तानामेव च मिथः पूर्वपदस्यापि
तिङन्तस्योत्तरेण सुबन्तेनेति च प्रकारोऽपि समासो भाष्यकारैः सह सुपेत्यत्र योगविभागेन कृतः समाधिः यथा सहेति छित्वा सुबामन्त्रित्वा सुपः स वि
त्यनुवर्तनीयम् सुबन्तं सह समस्यते केनेत्याकाङ्क्षायां समर्थेन अनेन तिङ्धातुनामभिः सुबन्तस्य सिद्धः ततः सुपेति निवृत्तम् सह स
मस्यते किं केनेत्याकाङ्क्षायाम् समर्थं न समर्थेन एतेन तिङः सिद्धः ततः सुपा समस्यते किमित्याकाङ्क्षायां समर्थम् एतेन तिङन्तस्य सुबन्ते
न सिद्धः अन्यतरेणाप्यन्तरस्यानित्यत्वज्ञापनादतिप्रसङ्गो नोद्भाव्यः ॥ २६ ॥ समासस्तु चतुर्धेति प्रायोवादस्तथा परः सोऽयं पूर्वपदार्थादिप्रा
धान्यविषयः स च ॥ २७ ॥ वादस्त्वन्वेनान्वयः तेनभूतपूर्वः इभ्यः कारणः पुनर्भूः आयतस्तूः कटप्रूः इत्यादिर्योगविभागसिद्धः समा
सोऽस्ति न त्वव्ययीभावादिष्वन्यतमः सोऽयमपरः पूर्वपदार्थादिप्राधान्यविषयः सोऽपि तथा प्रायोवाद इत्यन्वयः चोऽप्यर्थः सूपप्रति अर्द्धपिप्पली
सप्तर्षः द्विगुः शाखापलाशिनीत्यादौ क्रमेणाव्यभिचारादिति भावः अव्ययीभावः तत्पुरुषः शेषो बहुव्रीहिः चार्थो द्वन्द्वः अमी इत्यधिका
रेष्वपठितोऽव्ययीभावादिसंज्ञोऽन्यस्तु समासमात्रमिति तत्त्वम् ॥ २७ ॥ तन्नदः सर्वपदमध्ये परमयं तदर्थेन त्वयमित्यादिर्वा स्तवमप्याह
ह्याच्यतेऽत्र प्रक्रियां कल्पिताम् नाद्यः स्फोटस्याऽवयवस्य ध्वनिव्यङ्ग्यस्य वर्णाभासस्य निरन्यस्यापाधिवशात् ब्रह्मार्थप्रत्याख्यस्य वाचकत्वा
त् द्वितीये एवं एकामः किञ्जहत्स्वार्था वृत्तिरथाजहत्स्वार्था आद्ये समस्यमानानामर्थाभावः द्वितीयेऽन्यतरोऽन्यतरपदस्यार्थोऽन्यतरज्ञ न
न्यूनं ग्राहकमिति नास्ति तत्रार्थविभागोऽतः पूर्वपदार्थप्रधानोऽव्ययीभाव इत्याद्युत्सर्गोऽप्यनुपपन्न इत्याशङ्क्याह ॥ भोतसर्वासोऽपि रेखा ५

गवयादिवदास्थितः ॥ सः प्रायोवादोपि रेखागवयादिवच्छास्त्रप्रपञ्चनिर्वाहाय भौतस्यौदास्थित इत्यन्वयः शास्त्रे प्रक्रियायामपि कल्पिकाध्याहार्यारोपात्तत्र क्रमसमपेयत्पूर्वपदत्वेन यच्चोत्तरपदत्वेन यं च यदर्थेनान्वहीतन्सर्वमादायोपपत्तिरिति भावः ॥ इति वैयाकरणमतोन्मज्जनटीकायां वृत्त्युल्लासे समासोल्लासः पञ्चमः ५ ॥ समासस्य हि नित्यानन्त्वसङ्ग्रहत्वावतिरिक्ता शक्तिर्न तु प्रक्रियायां पूर्वोत्तरपदत्वेन लब्धोपपत्तिर्नैयायिकादीनां प्रक्रियैव परमार्थ इति युक्तः पन्थास्तमाह ॥ समासे खल्वभिन्नैव शक्तिः पङ्कजशब्दवत् २८ ॥ समास इति हि निमात्रोपलक्षणम् पराभिमतं दृष्टान्तमाह पङ्कजशब्दवदिति पङ्कजशब्दस्य यथा पद्मे शक्तिर्न तु लक्षणा नियतोपस्थितेः तथान्यायसाम्याद्बहुव्रीह्यादेरप्यन्यपदार्थे शक्तिरस्त्विति भावः ॥ २८ ॥ अतिरिक्तशक्त्यनभ्युपगमे गौरवमिमाह ॥ बहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महद्गौरवं तस्मादेकार्थीभावमाश्रितः २९ ॥ यद्यतिरिक्ता शक्तिर्नाङ्गीक्रियते तदा बहूनां वृत्तिधर्माणां वचनैः साधने गौरवम् तथा च वार्त्तिकं समर्थसूत्रे सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो नेति न्यायसिद्धोर्थो वार्त्तिककारेरुपनिबद्ध इति तत्रैव सूत्रे महाभाष्यम् । अथैतस्मिन्नत्यपेक्षायां सामर्थ्ये योसावेकार्थीभावकृतो विशेषः स वक्तव्य इति एतद्भाष्यस्य कैयटः यदि हि तत्रैकार्थीभावो नाभ्युपगम्येत तदा वाक्यवत्संख्याविशेषोपसर्जनविशेषणादीनां प्रसंगात्तदभावो वचनेन प्रतिपाद्यः वा वचनं च कर्त्तव्यम् समानार्थस्य वाक्यस्यानिवृत्त्यर्थम् तदेवं शब्दस्य स्वाभाविकं रूपं कदाचिन्निरूपदर्शनाप्रयोगेणानुगम्यते कदाचिद्बुधबोधनार्थं कार्यदर्शनाश्रयेण कार्यपक्षे तु बहवो वार्त्तिधर्मा वचनेन प्रतिपाद्या इति गौरवप्रसंगः तथा हि निःकौशाम्बिर्गोरथो घृतघटो गुडधानाः केशचूडः सुवर्णालङ्कारो द्विदशाः सप्तपर्णो गोरथ उष्ट्ररथ इत्यादिषु क्रान्तयुक्तपूर्णमिश्रसंतानविकारसंघस्य यलोपादीप्साजातिविशेषाभिधायित्वं वचनप्रतिपाद्यम् नित्यदर्शने त्वेकार्थीभावकृत एवायं विशेष इति न किंचिन्निपादनीयम् तत्रैव सूत्रे वार्त्तिकम् वचनानर्थक्यं स्वभावसिद्धत्वादिति इहूतो च समसामर्थ्ये इति सूत्रे ऽर्थग्रहणं चातिरिक्तशक्तिसाधने लिङ्गम् तस्य व्याख्याने वार्त्तिकं मा पूर्वपदस्य भूदिति तत्रोदाहरणम् वाप्यामश्वो वाप्यश्व इति तत्र लक्षणशक्तिवादी अप्रक्रियमाणे ऽप्यर्थग्रहणे कस्मादेवात्र न भवतीत्यधिविदेव एतस्य कैयटः अस्त्येवात्र सामर्थ्यम् इति प्रश्न इति तत्र सिद्धान्तभाष्यम् जहत्स्वार्था वृत्तिरिति एतस्य कैयटः समासस्य वाप्यश्वात् पूर्वोत्तरपदयोर्वर्णवदानर्थक्यात्सामर्थ्यं नास्तीत्यर्थ इति ॥ २९ ॥ गौरवान्तरमाह ॥ चकारादिनिषेधोथ बहुव्युत्पत्तिभञ्जनम् कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः ३० ॥ निषेधान्तेनान्वयः द्वन्द्वादाविति शेषः आदिशब्दाद्बहुनघ्यामोहं सगमने स्मादाविवादीनाम् अघेति तेरसमन्तेनान्वयः तथा ऽतिरिक्तां शक्तिमनभ्युपगच्छता तथा हि ऊढोरथो येन यदाश्रयो ढ्हनानुक्तो येऽव्यापारस्तदाश्रयो रथ इति वा केवेबाधो रथविशेषकः ऊढरथ इति ह्येतोत्तरस्य निषेधं यद्दृष्टं तदनुक्तलव्यापाराश्रय इति कर्तृविशे-

वै. पा.
६ भू.

ष्टकः तथा जायाप्रतिग्राहितगन्धमाल्यादिमत्त्वस्य वाक्ये जायानिष्ठं यत्स्वीकरणं तद्विषयग्रहं तदेवाश्रयकं यत्प्रहरणं तद्विषयभ
तेगन्धमाल्यैरतिकर्मविशेषकोबोधः बहुव्रीहौ तु जायानिष्ठं यत्स्वीकरणं तद्विषयप्रहरणं गन्धमाल्यविषयकं तदाश्रयभूतायेन
रितिबोधस्त्वभिन्नाश्रयविशेषकः वृत्तौ भिन्नाश्रयत्वप्रतीतौ केति भिन्नेति कल्पनीयं स्यादित्यर्थः तस्मात्त्वत्रिभक्तं नमस्माकमतिरिक्त
शक्तिवादिनां न्यायसिद्धम् एकार्थीभावकृतविशेषात्मककल्पनाद्वरमेवेति भावः ३० ॥ अतिरिक्तशक्तिरस्माभिर्नस्वीक्रिय
तेऽरति शब्दमात्रमेवास्तिभवतां वस्तुतस्तु स्वीकृतेव स्थलविशेषइत्याह ॥ अप्रथमार्थबहुव्रीहौ त्वन्मतेऽपि कल्पना लक्षणमाग
श्यास्तितवतु तर्किं शक्तिं न कल्प्यते ३१ ॥ प्रथमार्थे तावद्बहुव्रीहिरेव न अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति वार्त्तिकात् सत्यान्तरेरेवायमर्थो
लभ्यत इति भाष्यकाराः तथा हि शेषो बहुव्रीहिरित्यत्र त्रिकतः शेषः तत्र द्वितीयाश्रित तृतीया तत्कृतार्थ चतुर्थी तदर्थार्थ पञ्चमी
भयेन षष्ठी सप्तमी शौण्डैरिति षट्का सूक्तानि शेषत्रिकस्याप्रथमान्तस्य बहुव्रीहिः सत्याप्रथमार्थ एव संभवति द्विङ्गामानान्तरा
ले इत्यादि योगानां प्रथमार्थत्वाच्च एतेन चित्रगुरित्यत्र चित्रा गावो यस्य स्वामीति विग्रहे तत्र मीमांसकाः प्रसक्ताः राज्ञः पुरुषो रा
जपुरुषः इत्यत्र राजा चासौ पुरुषश्चेति विग्रहापित्तेषाम तान मूलपत्व अलक्तत्व दोषप्रसंगात् एवं स्थिते प्राप्तमुदकं यं ग्रामम् ऊढो रथो
येन उपहृतः पशुर्यस्मै उद्धृत ओदनो यस्याः बद्धः पाचकाय स्याः शालायाम् इत्यादौ वाक्ये यद्ग्रामादिनिष्ठाप्राप्तिजनकीभूत
क्रियाश्रयउदकम् यदनडुहादिनिष्ठव्यापारजन्यायाप्राप्तिस्तद्धान्तरथः यद्रुद्राद्युद्देश्यकव्यापारजन्यं यदुपहरणं तद्धालीपशुः यस्याला
यद्वधिकभावनाफलीभूतो य उद्धारस्तदधिकरणमोदनः शालाद्यधिकरणिकाया यान्यादनाविक्लित्त्यनुकूला तदाधारा इति लक्षणस्यायागः
वृत्तौ तु विपरीतगुणप्रधानभावः तथा हि उदकस्य व्यापारजन्याया प्राप्तिस्तद्धालीग्रामः रथस्य प्राप्तेर्जनकीभूतो यादनाश्रयो वह्री
वहादिः पशुसमवेतोपहरणस्य कारणं या क्रिया तस्या उद्देश्यो रुद्रादिः ओदननिष्ठो द्वारस्य हेतुर्यो व्यापारकलापस्तस्यावधिः स्था
दिर्विक्लित्त्यनुकूलः कश्चिद्विशेषो यो व्यापारसन्तानस्तस्याधिकरणं कर्त्रादिद्वारा शालादिरिति एवं बहुव्रीहौ तु त्वन्मतेऽपि लक्षणेवाका
पलक्षणत्रय त्वन्मतेऽप्यावश्यकत्वात् तर्हि शक्तिं किं न कल्प्यते लक्षणस्थलेऽप्युपपन्नातिरिक्तशक्तिस्वीकारे गौरवमिति शब्दमात्रमि
ति भावः लम्बकर्णो यस्येत्यत्र क्रियाया अनावश्यकत्वात् मिथोऽभेदात् न्यपदार्थेन लक्षणायोपपत्तिरिति चेतसि कृत्वोक्तमपस्यर्थय
ति ॥ ३२ ॥ नन्वेवमन्तरङ्गत्वात्कर्मधारयोऽस्तु न तु बहिरङ्गो बहुव्रीहिरित्यादिविचारोऽनुपयुक्तो ऽतिरिक्तशक्तावन्तरङ्गबहिरङ्ग
त्वयोरभेदेनासंभवादित्याशङ्क्याह ॥ पर्यवसन्नाद्बोधाद्विहरप्राक्तनस्थितेः शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम् ।
३३ ॥ शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनमविरुद्धमिति शेषः किंभूते शक्तिग्रहे पर्यवसन्नाद्बोधाद्विहरप्राक्तनस्थितेरन्य ६
न्वयः पर्यवसन्नो यः शाब्दबोधस्तस्माद्विहरस्थायो यो प्राक्तनस्तत्र स्थिते शक्तिग्रहे पदत्वाद्हि तत्पूर्वकाले उपस्थितिन विग्र

वाक्ये ऽन्तरङ्गत्वबहिरङ्गत्वविचारे ऽस्य विरुद्धमिति शेषः बाधे ऽन्तरङ्गकार्योपादानं बहिरङ्गत्यागः बाधे त्वबहिरङ्गोपादानमन्तरङ्गत्यागः ए
वमात्मकेन कश्चिद्विरोध इति भावः ॥ ३२ ॥ इति वैयाकरणमतोन्मज्जनटीकायां वृम्मलासे बावतिरिक्तशक्तिसाधनोल्लासः षष्ठः ६ ।
। शक्तिं विवेचयति ॥ इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ३३ । इन्द्रियाणां चक्षु
रादीनां स्वविषयेषु चाक्षुषप्रत्यक्षादिषु घटादिषु यथा ऽनादिर्योग्यता न चेदानीं तनीत्यर्थः एवमर्थैः सह शब्दानामप्यनादिरेव योग्यतेत्यन्व
यः घटपदे योग्यता सा च नित्या तेन न घटशब्देन पटो बोध्यते सा च सामर्थ्यात्मिका अत एवार्थानामनित्यत्वपक्षे ऽपि नित्य एव शब्दा
र्थसंबन्धः तथा च प्रथमवार्त्तिकम् सिद्धे शब्दार्थसंबन्धे लोकतो ऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु अत्र
वार्त्तिके कैयटः सम्बन्धस्य योग्यतालक्षणत्वात्तस्याश्च शब्दाश्रयत्वाद्दोषस्त्वर्थानित्यत्वपक्षे परिजिहीर्षा नन्वनियतपदार्थाभिधाने
नो रवादीश्वरेच्छैव शक्तिरिति चेन्न ईश्वरेच्छा भवन्मते नित्यैका च प्रतिशब्दम् ततः संकरप्रसङ्गः किं चेच्छाज्ञानप्रयत्नानामिच्छैव शक्ति
रित्यत्र नियमे विनिगमकस्य चिन्त्यताम् उपाधिवशाद्विशेषकापि भिन्ना तेन न सांकर्यमिति चेत् तर्ह्येवं त्वत्सिद्धान्तः अस्माभिरपि मर्या
दोक्तमस्तु ईश्वर एवोपाधिवशाद्भिन्नः सन् शक्तिरिष्यताम् एतेन समवायः शक्तिरित्यपि परास्तम् किं च समवायाभ्युपगमे प्रमाणमे
व नास्ति घटादौ समवायः स्वरूपेण वृत्तेरन्यस्यावश्यकत्वाज्जात्यादिरपि स्वरूपेणैवेति वक्तुमुचितत्वात् न चानियतपदार्थाभ्युपगमः
भवतामप्युपाध्यायानन्ताः दुग्धादिनवादिभिरुपाधिभिः पदार्थाव्यवस्थायन्ते स्वामित्वभाववत्वाभाववताभ्यां नित्यत्वानित्यत्वाभ्यां वेति न किं
चिदुःस्थम् योग्यतैव साधुत्वम् ॥ ३३ ॥ नन्वेवं गाव्यादिशब्दानां साधुत्वप्रसङ्ग इत्यत आह । असाधुरनुमानेन वाचकः कैश्चिदिष्यते वाच
कत्वाविशेषे वा नियमः पुण्यपापयोः । ३४ । गाव्यादिः शब्दो ऽनुमानेन साधुत्वस्मरणद्वारा घटो वाचकः कैश्चिदिष्यते ऽतो गाव्यादिश
ब्दो ऽसाधुरित्यन्वयः साक्षादर्थप्रतीतिजननयोग्यत्वं शक्तिस्तदेव साधुत्वम् पारम्पर्येणप्रतीतिजननयोग्यत्वमसाधुत्वमिति भावः नव
गाव्यादिः साक्षात्प्रतीतिजनको न गवादिस्तु साक्षादित्यत्र वैपरीत्यमेव किं न स्यादित्याशङ्क्याह ॥ वाचकत्वेति [illegible] येषामस्तु
दर्थप्रतीतिजननयोग्यत्वम् अयं साधुरेवायमसाधुरेवेति नियमः पुण्यपापयोरेव उभयप्रसङ्गरत्यर्थः पुण्यजननयोग्यत्वं शक्तिस्तदे
व साधुत्वम् पापजननयोग्यत्वमसाधुत्वमिति तत्त्वम् तत्रापि यज्ञे यज्ञे ऽभ्युदयजननयोग्यः साधुर्विपरीतस्त्वसाधुः तथा च प्रयोजनभा
ष्ये ज्ञाचारे नियमः एतद्वार्त्तिकव्याख्यानभाष्यम् याज्ञे कर्मणि स नियमः अन्यत्रानियम इति याज्ञे ऽभ्युदयजननयोग्यत्वं शक्ति रि
ति भावः नन्वेवं गाव्यादिषु शक्तिर्न स्यात् धर्मात्तत्रार्थप्रतीतिः अस्तु वा यथा कथंचिदर्थप्रतीतिजननयोग्यता शक्तिः साधुत्वं तु याज्ञे
कर्मण्यभ्युदयजननयोग्यत्वं तद्विपरीतत्वमसाधुत्वमिति । ३४ ॥ ननु योग्यता ऽतीन्द्रिया कथं साध्यवसेया योग्यताशब्दादौ चकाग
तिरित्याशङ्क्याह ॥ संबन्धशब्दे संबन्धो योग्यता प्रतियोग्यता समयाद्योग्यतासंवित् मातापित्रादियोगवत् । ३५ । सा योग्यता संबन्ध

शाब्दे संबन्धः योग्यतां प्रति योग्यताशब्दं प्रति योग्यतायाः संवित्त्तानं समयाद्द्वसंकेतात् व्यवहारात् मातापित्रोर्योगोऽप्रमत्तोपी यंमा
ताऽयं पितेति समयाद्यथा प्रतीयत इत्यर्थः शक्तिः स्वमते योग्यताव्यवहारगम्याऽनन्यात्वेति साधुत्वं यथोक्तं कर्मसपन्नादयजननयोग्यत्वम॰
दो विपरीतत्वमसाधुत्वमिति च स्थितम् सर्वैवोपाधिविशेषसंवलिता शक्तिः साच ब्रह्मालिके नित्यत्वपरमार्थस्त्वबोध्येयम् ॥ ३५ ॥ इतिवै
याकरणमतोन्मज्जन्नीकायां शक्तिसाधुत्वासाधुत्वनिरूपणोल्लासः सप्तमः ॥ ७ ॥ वृत्तिप्रसंगेन नञर्थं निरूपयति ॥ नञ्समा
सेनञ्तरस्यप्राधान्यात्सर्वनामता आरोपितत्वं नञ्द्योत्यं तस्य सोपपत्तिसर्ववत् ॥ ३६ ॥ नञ्समासे सर्वनामताकृतः उत्तरस्यपदस्यप्राधान्या
त् दियतः असर्वे अतिसर्वत्र आरोहेतोरारोपितत्वं नञ्द्योत्यमित्यन्वयः एतेन नञ्समासे नञर्थविशेषकोबोध इति ब्रुवन्तः परास्ताः
तथाहि यदि नञर्थविशेष्यकोबोध इति ब्रूयेत तर्हि तत्पुरुषत्वं नस्यात् उत्तरपदार्थप्रधानस्तत्पुरुष इति तत्पुरुषलक्षणात् उत्सर्गोयमिति चेत्
तथापि तस्य गेप्रमाणं ब्रूहि नञर्थविशेष्यकाप्रतीतिरेवप्रमाणमिति चेत् न अव्ययीभावप्रसंगात् पूर्वपदार्थप्रधानोऽव्ययीभाव इति त
ल्लक्षणात् स्वपप्रतीत्या हैव व्यभिचारात्तादर्थ्ये नियम इति चेत् उच्यते नञर्थविशेष्यत्वे ऽतिसर्वैत्रियसर्वै इत्यादाविव सर्वनामत्वाभावादतस्मि
न् असर्वस्मै इत्याद्यसिद्धिः एतन्नदोषः सलोपोऽकोरनञ्समासत्वमनञ्समासत्वप्रसंगतस्मात् गौणत्वाभावाद्यत्वाभावान्नदोषः सोपाविति
सत्वाभावादतिस्पदितिवद्धल्ङ्याबितिस्सलोपापत्तोरनुपलम्भात् ननु नञ्समास इति निषेधएव नञ्समासे सर्वनामत्वादेः साधकइतिचे
त् अथोच्यते नञर्थविशेष्यत्वे अब्राह्मणा भवन्ति वायोरूपाणि नसन्ति अत्वंभवसि अनहंभवामीत्यादौ वचनपुरुषव्यवस्था नस्यात् न
नोद्योत्यत्वेऽर्थे कथमन्वयबोधः उच्यते पर्युदासे आरोपितो ब्राह्मण इति ब्राह्मणाभावस्त्वार्थिकोर्थः प्रसज्यते नञः क्रियान्वयात्कि
याया विशेष्यत्वाद्वायोरूपाणि नसन्तीत्यत्र बहुरूपाश्रिताया सत्ता त्वथा रणात्योतत्वत्वेरूलोवर्तमानोव्यापार इति ननु विशिष्टसत्ताया सत्तव
अप्रसिद्धेः कथमारोपसंभवः उच्यते घटादिस्वाससत्ताप्रसिद्धा अधिकरणं करादिव रूपाणि घटादिस्वानि तेषां संसर्गमात्रारोपः सो
पात्यत्रप्रसिद्धः यद्वा ताहग्विलक्षणस्वभावाद्धुवेनाऽर्थएववाक्यार्थो बोध्यते अन्यथा शब्दो नित्य इति प्रतिज्ञायां नैयायिकस्यार्थबो
धो नोदियात् अनित्यत्वस्मैकेमीमांसकस्य ततस्त्वूपूतपन्याउभयेषामसंगताःस्युः ॥ ३६ ॥ इतिवैयाकरणमतोन्मज्जनटीकायां नञ्
र्थोल्लासोऽष्टमः ॥ ८ ॥ चादीनां वाचकत्वं निरस्याप्युपसर्गवद्द्योतकत्वं स्थापयन्नाह ॥ द्योतकाः प्रादयोयेन निपाताश्चादयस्तथा उपास्य
तेहरिस्त्वैलकारोह्मपतेयथा ३७ । येनप्रकारेण नैयायिकादीनां मते प्रादयोनवाचकाः किंतुद्योतकास्तेनैवप्रकारेण चादयोपि
द्योतकानतुवाचकाः निपातास्त्वनेनैवसिद्धेचादयइति छन्दः पूरणाय यद्वा येनेति हेतौ तृतीया तेनेत्यध्याहारः येनैव हेतुना तथा द्यो
तकास्त्वर्थः उपपत्तिं दिशमाह उपास्यतेहरिरिति कर्मणीत्यध्याहारः यथा तथा लक्ष्यते गुरुर्नमस्यते चेत्यादावपि द्रष्टव्य इत्यन्वयः ॥
३७ ॥ एतदेवाह ॥ तथात्र निपातेपि लकारः कर्मवाचकः विशेषणाद्ययोगोपिप्रादिवच्चादिके समः । ३८ । अयंभावः उपास्यते

लक्ष्रियते रस्मादाद्युपासनाल्लकारादय उपसर्गनिपातनां वाऽर्थाः विशिष्टस्य धातुमात्रस्य वा नाद्यः निपातोपसर्गयोः
सकर्मकत्वात् धातोरकर्मकत्वाल्लनोः लकारार्थाभावादन्यक्रियायाः कर्मणि लकारायोगात्कर्मणि लकारानुपपत्तेः ।
न द्वितीयः विशिष्टस्य गणपाठाभावादातत्वाला भाल्लकारानुपपत्तेः गणपाठो हि भ्वादय इति चेत् ओम् न तूपसर्गनिपातवि
शिष्टस्य धातुत्वमङ्गीकर्तुं शक्यते उपास्यतेऽनुभूयते हित्वनिमित्ते प्रत्यये ऽजादेर्द्वितीयस्येत्युपसर्गनिपातावयवस्य द्वित्वप्रसङ्गा
त् अडादिकमुपसर्गनिपाताभ्यां प्राक्स्यात् उपपन्नतरमाह विशेषणेति भूयान्प्रकर्षः कीदृशो निश्चयः स्याद्विधया विशेषण
योगस्तथा भूयान्प्रकीदृशो निरित्यादिविशेषणयोग उपसर्गाणां नभवति पदार्थैकदेशत्वात् सुन्दरः समुच्चयः कीदृशो निश्चयः
इत्यादिविशेषणयोगोऽस्ति सुन्दरसमुच्चयः कीदृशश्च पवेत्यादिविशेषणयोगो न भवति पदार्थैकदेशत्वादेव आदिशब्दादेतस्य प्रकर्षे इत्या
दौ प्रकर्षशब्दादीनां यथा षष्ठीदेतत्वमेवं प्रादीनां न भवति एवं घटपटयोः समुच्चय इत्यादौ समुच्चयशब्दादीनां षष्ठ्यादेतत्वानैवं घटपट
योश्चेति चादीनां न भवति तदेवमुपसर्गनिपातयोर्वैलक्षण्यं न द्रष्टव्यं तत्त्वार्थैः संप्रतिप्रमाणाभावमुपन्यस्यति ॥ पदार्थः सदृशान्वे
ति विभागेन कदापि न निपातेतरसंकेतो प्रमाणं किंविभावय ॥ ३७ ॥ सदृशासदृशो न संबन्धशब्दत्वात् पदार्थेनेत्यर्थः विभागः
पदार्थैकदेशः पदार्थः पदार्थेन संबध्यते न तु पदार्थैकदेशेनेति व्युत्पत्तिर्निपातेतरविषये तत्र प्रमाणसामान्याभावः अस्माकं घो
तकत्वादेव पदार्थैकदेशत्वाच्चादीनां पदार्थसंबन्धभावनैव नेति सर्वं निरवद्यम् ॥ ३८ ॥ चादीनां वाचकत्वेन्वयानुपपत्तिमाह ॥
शरैः स्वैरिवोदीच्यानुद्धरिष्यन्नसानिव रसादावन्वयेन स्यात्त्वपाच श्रवणं ततः ३९ ॥ शरैः सदृशैः उस्रैः रसान् सदृश्यान् इत्यादौ
पदार्थेनेनोपस्थितैः शरसदृशैः उस्रैः रससदृशान् दीच्यानित्यादिगुणप्रधानभावोऽनुपपन्नः इवशब्दार्थस्य तीयायाश्च नेनान्वयश्च ।
प्रत्ययाणां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् अस्मन्मते तु इवादीनां तात्पर्यग्राहकत्वात् शरादीनां सदृशादिसदृशे लक्षणेत्यदोषः दो
षान्तरमाह सुपां चेति लुकापरूपाद्वादिभ्यः सुपामनुपपत्तिः सति वाचकत्वात्सार्थाभावान्निपातत्वाभावात्स्वप्रत्ययाभावान्नपः सूत्रे
२२ ॥ ३९ ॥ ननु चादीनामर्थाभावान्नञ् नञ्स्वरूपादौ किमयं सर्वं पदार्थप्रधान उतोत्तरपदार्थप्रधानमित्यादिविकल्पयन्यासंगतिरि
त्याशङ्क्याह । नञ्समुच्चये तु नञ्समासे तत्पुरुषप्रतिप्रधानता द्योत्यमेवार्थमादाय जाय नेनामतः स्मृतः । ४० ॥ नजादिद्योत्यो योऽर्थस्तं प्रसन्न
र पदार्थः प्रधानम् नमेवार्थमादाय नामसत्ता प्रातिपदिकत्वमिति यावत् ततः सत्तात्त्विरित्यर्थः ॥ निपातत्वं जातिरूपाधिः स्यादन्य
पचुतमन्येकं पर्यवसितमित्याशङ्क्याह । निपातत्वं परेषां यत्तदस्माकमिति स्थितिः प्रादिष्वपि तु वैलक्षण्यं चादीनां किंविभावय । ४१ ॥
परेषां नैयायिकादीनां मते निपातत्वं यः पदार्थो जात्यादिस्तु सप्ववास्मते सर्वथापि तेषां मते घोतकेभ्यः प्रादिभ्यश्चादीनां वैषम्यादर्शनात् अतो

हे जरतीये बीजं त्वेतन्मम् एतच्च सर्वं तत्र तस्यैवेति स्तत्त्वे कैयटे द्रष्टव्यम् ॥ ४१ ॥ इति श्री वनमालिमिश्रकृतायां वैयाकरणमतोन्म
ज्जनटीकायां निपातानां द्योतकत्वस्थापनो ह्लासो नवमः ॥ ९ ॥ वृत्तिभेदं निरूपयति । जहत्स्वार्था जहत्स्वार्थे द्वे वृत्ती तेषु तस्त्रिधा भेदः सं
सर्गरूपं वेति वाच्यत्वस्थितेः ॥ ४२ ॥ जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था पदे राजपुरुषादौ पदानामानर्थक्यम् बोधकम समये
आहार्यारोपेण यावद्भेदेन पदपदार्थत्वेन जगाहत तत्किमपि न भासते पिंतु विशिष्टमर्थान्तरमेव प्रतीयते तच्चाविभक्तम् पि एवं पासस्वरकव
त् नजहति पदानि स्वार्थं यस्यां सा तथा सर्वपदमुत्तरपदार्थग्राहित्वं स्वपूर्वपदार्थमितरत्समर्थग्राहकम् पदद्वयेप्यतिरिक्ता शक्तिसिद्धिः
तथा हि विशेषणाद्यनर्हतयातिरिक्ता शक्तिः कल्प्यमानारोपत्वागवयन्यायेनावृध बोधनापारेपि न पूर्वोत्तरपदार्थानां बाधेन कल्पनीयोतः
बाधेन लाघवादाधेनैव विशिष्टस्यैव विशिष्टे शक्तिरिति जहत्स्वार्था अबाधेनैवोपपत्तौ बाधो नन्याय्य इत्यजहत्स्वार्था यत्र भाष्ये चार्थे द्वन्द्व इति
सत्रेसेयं युगपदधिकरणवचनतानाम दुःखाद्युरूपपादाचेस्तकं तस्यायमाशयः परिनिष्ठितार्थमादाय वाक्यरचनेनोत्क्रमिकां नाहार्यारोप
नं आद्ये राजा चासौ पुरुषश्चेत्यादितस्वरूपादेर्विग्रहापत्तिः न चेष्टापत्तिः अलुक्समासस्य तत्स्वरूपे च तत्वार्थत्वादीनां च निर्विषयतापत्तेः
अलुक्समासस्वरस्य लेचान्यथानुपपत्त्या स्वतारश्यो विग्रह इति चेत् न जहत्स्वार्थोरीकारात् निमित्तभूतसंबन्धरूपार्थोसत्त्वात्सबष्ठ्याद्येर्लं
भात् वचनसामर्थ्यान्निमित्तापायन्यायबाध इति चेत् न लाघवात् षष्ठीमात्रमेवसर्वपदेशाप्यताम् एवं स्थितेपवदावेदिराविशादेर्विव
रणोधवत्सवेदिस्थेप्रक्रियादशायामपि आहार्यारोपेणजातस्यैकवचनस्यत्यागो नोचितः निमित्तापायस्यानित्यः नन्वेवमादस्त्रवाऽ
अयुक्तालिङ्गश्चेति विग्रहे क्रियमाणे तत्र न बहुत्वाभावाल्लुङ्स्यादिति चेत् न नैनैवेति सोऽशास्य बहुवचनेपरत इति व्याख्यानस्याभाष्यकारेण
वैवस्तत्वे प्रत्याख्यातत्वात् बहुषु वचने मानस्य तद्राजस्य लुगिति व्याख्यानतनाञ्च तनश्चाजहत्स्वार्थायामपि तत्त्वस्यायां प्रतीयमानबहुत्वाथा
रस्याभात् एवं गत्वा तद्राजेनोक्तत्वात् तद्धितेष्मावेकशेषप्रवृत्तोच तद्राजस्यानर्थक्यात् एवं स्थिते द्वन्द्वैकशेषयोः प्रक्रियावाक्येपि द्विवचनं न
लभ्यते लौकिके तथैव लाभो हृत्यपासः यथोच बहिदिवेचेत्यादि द्विवचनेन विग्रहो दुःखोऽनुरूपपादश्चेति तन्न्यम् एतेन राजा चासौ पुरुषश्चेति
विग्रहे मीमांसकाद्यपिप्रयुक्ताः यत्र केचिदे नद्रूपपादेति प्रतीकमादाय प्रमाणाभावादिति व्याख्यानं तच्चिन्त्यम् वृत्तावन्यतरस्यान्य
तरार्थत्वादन्यतरस्य तात्पर्यग्राहकत्वाद्वृत्तौ तथैव हद्रव्यवहाराच्च युक्तिस्तत्रोक्ता अतिरिक्ता शक्तिः कल्प्यमानाहार्यारोपेण प्रक्रियादशा
यामपि पूर्वोत्तरपदार्थमङ्गीकृत्यैवाबाधेनैवोपपत्तौ बाधो नन्याय्य इति न्यायेन कल्पनीयेति एतत्सर्वं हृदि निधाय यहेवृत्तिमलेपरं स्वम्
समकालं उभयमपि प्रमाणसिद्धेरिति भावः एतेन क्रमिकावोधानादाय वाक्यरचनेतिपक्षेश्टापत्तिः तेषु नीरिति सिद्धान्तेपकार्थीभावेव
त्तिः सभेदरूपो नाघवाभावात्रैयकत्वेन प्रतीयमानसंसर्गः अस्मिन्पक्षे राजपुरुषः औपगवः कुम्भकार इत्यादावराजकीयपुरुषभिन्नः अन्यप ८

गवपमभिन्नः अकम्मकारमिन्नः इति शाब्दबोधः राजोपकुम्भसंबन्धित्वं नान्तरीयकतया लभ्यं संसर्गः लाघवात्
प्रत्यासत्त्या चेति भावः अस्मिन्पक्षे संबन्धः संसर्गमर्यादया भासते न तु स्वस्वामित्वादिना विसंबन्धत्वेन यथा घटर
स्य च घटघटत्वयोः समवायः अस्मिन्पक्षे त्वतलादीनां प्रवृत्तिनिमित्तं संबन्ध एव तदुक्तं हरिणा कृत्तद्धितसमा-
सेभ्यः संबन्धाभिधानं भावप्रत्ययेनान्यत्र रूढाभिन्नरूपाव्यभिचरितसंबन्धेभ्य इति। उभयमिति विनिगमकाभा-
वादिति भावः ततश्चोभयोः प्राग्देवोधेभानम्। एतच्च भाष्यकैयटयोः समर्थसूत्रे विस्तरम्। ननु एवं वृत्तिवाक्ययो-
र्भिन्नार्थत्वाद्विवरणमसंगतमत आह ॥ विग्रहस्त्वविग्रहेणार्थेन समर्थ्यते भिन्नार्थ एव भिन्नं च वाक्य
वृत्त्योरिति स्थितम्। ४३। स्थितं स्वाभाविकमित्यर्थः तथा च वार्त्तिकम् वावचनानर्थक्यं स्वभावसिद्धत्वात् विकल्पाधि-
कारे पठितः समासो वैकल्पिकः अन्यस्त्वनित्यः स्यैव राजाघात्रस्य प्रयोजनम् नित्यवैकल्पिकसमासयोरपि स्वरादिप्रयोज-
नम् विग्रहो द्वेधा लौकिकालौकिकभेदात् प्रयोगार्होऽर्थप्रमापनसमर्थस्त्वाद्यः एतद्विपरीतो द्वितीयः ननु किमर्थमसाव-
ङ्गीक्रियत इति चेत् उच्यते गोमतस्प्रियस्य इति स्थितेऽन्यपदार्थेऽन्तरङ्गत्वात्समासे योगात्तल्लोपे दीर्घत्वे कृते नु ह्रस्व-
यत्वणत्वसमुस्कुर्वाणो मान्य इति वृत्तिः स्यात् तस्मादन्तरङ्ग इवाऽपि बहिर्भावेन जायते जातायां च समासत्वात्तद्धितान्तत्वा-
त्प्रातिपदिकसंज्ञायां गोमत्प्रती त्याहो च धातुसंज्ञायां तत्पोधातुप्रातिपदिकयोरिति लुकि प्रत्ययलक्षणेन निषेधात् लु-
मतात्यप्रत्ययोः सोऽप्यनयस्त स्मिन्वस्तुतो परङ्गतस्य लुमतात्वे प्रत्ययेऽप्रत्ययलक्षणेन निसत्वात्यान्तरङ्गाधिकारः प्र-
तिनिर्दिश्यते गोजिगमिषं संविभुत्सन्वत्परेल्ले किरको विधिप्रतिषेधानापत्तेः उक्तामेव्यत्क्रमेदीर्घत्वनिर्दिष्टत्वाभावाच्च स-
र्वस्तोमस्मादोऽसर्वशक्त्या घटो वृत्तिवचनमेव कर्त्तव्यम् ननु कथं बहिरङ्गप्रतीत्याऽन्तरङ्गस्य बलीयस्त्वात् उच्यते तत्र च
त्वत्वच मम गोमस्त ज्ञाप्यास्तावत्तद्वर्त्तिनी विभक्तिमाश्रित्य त्वमादेकवचनेऽस्य नेन सिद्धोत्वमोप्रत्ययोत्तरपदयोश्चेति वचना-
नर्थक्यम् ननु विभक्तेर्लुकात्मत्वान्नास्ति प्रत्ययलक्षणमिति चेन्न अन्तरङ्गत्वादादावादेशेषु कृतेषु पश्चाल्लुगिति किं स्वश-
रम्भेण अग्रिस्त्वं सन्त्यापयतिना दावन्तरङ्गविधयोजायन्ते इति ननु त्वादादीनामेकवचनादेशानां बाधनार्थत्वात्कथं त्वाप-
कम् अत्रकैयटः प्रत्ययोत्तरपदयोश्च त्वत्वाहादयोमपर्यन्तस्येति चानुवर्त्तते तत्रादेशात्तदप्यातेषां बाधः सिद्धः त्वमावेकवच

वै. भू. भू.
२

इत्यनेनान्वयरूपबाधमयोः सिद्धत्वाद्वचनारम्भो ज्ञापकोऽन्वयरूपाभावस्येति मिश्रास्तन्न समपर्यन्तमात्रमनुवर्त्तते तेनादे-
शः तत्र समपर्यन्तस्यादेशोऽपहारात्तस्यान्वयाभावाद्वचनेनादेशविधानान्यथानुपपत्त्यान्वयरूपबाधः समपर्यन्तानुवृत्ति-
स्तु त्वयाकृते त्वत्कृतमित्याद्यर्था तत्रान्वयरूपाणां बाधकमिति केचित् स्वपो धातुप्रातिपदिकयोरयमेव बा-
धकः प्रकृते तस्यैव संभवात्। अयन्तु समानार्थकविवरणवाक्यस्यासंभवएवेत्याह। आख्यातेन तद्धितकृतोर्यत्किञ्चि-
दुपदर्शकम्। गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः। ४४। विवरीतव्ययोस्तद्धितकृतोर्यत्किञ्चिदुपदर्शकं विवर-
णमाख्यातेन तत्राख्यातेन गुणप्रधानभावादौ विपर्ययो दृष्टः आदिशब्दात्काले तद्धितकृतोरित्युपलक्षणं समासेऽपि ज्ञेय-
म् इत्यन्वयः। आस्तिकः पाचकः कुम्भकार इत्यादौ विवरीतव्येष्वस्तकरणकक्रीडायां विक्लित्यनुकूलक्रियायाः कुम्भक-
र्मकोत्पादनायाः क्रमेणाश्रय इति क्रमेणाश्रयप्रधानको बोधः कालसंख्ययोरभानं च अस्तैर्दीव्यति पचति कुम्भं करो-
तीत्यादिविवरणवाक्ये त्वस्त्रनिष्ठव्यापारस्यैकनिष्ठावर्तमानाभावना विक्लित्यनुकूलैकनिष्ठावर्तमानाभावनाऽनुकू-
लफलकैकनिष्ठावर्तमानाक्रियेति क्रियाविशेष्यको बोधः संख्याकालावगतिश्च॥ कृत्तद्धितसमासेभ्यो मतभेद-
निबन्धनम्। त्वतलोरर्थकथनं टीकायां हरिणा कृतम्। ४५। पाचकः दण्डी स्ववासा इत्यादौ विक्लित्यनुकूलक्रियासं-
बन्धाश्रयः दण्डसंबन्धाश्रयः शोभनवस्त्रसंबन्धाश्रय इत्यादिरीत्या बोधात् संबन्धोऽपि कृत्तद्धितसमासार्थः तत्रस्वामीभ्य-
स्त्वतलादीनां तस्यैव प्रवृत्तिनिमित्तत्वात्तस्यैव त्वतलाद्यर्थत्वात्तद्विशेषणकएव बोधः पक्तृत्वं दण्डित्वं सुवासस्त्वं पाकद-
ण्डसुवस्त्राणां संबन्धः तत्र दृष्टो भेदः संसर्गोऽभयं चेति मतत्रयम्। मध्यमे पक्षे चैतदित्याह मतभेदेति आद्यचरमयो-
स्तु अपक्तृभेदः अपक्वभेदः पाकसंबन्ध इति बोधः कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनाप्यत्र वृद्धाभिन्ना-
व्यभिचरितसंबन्धेऽस्य टीकायामर्थकथनेयत्नमतभेदनिबन्धनं न्यायसिद्धं तद्वाचनिकमिति भावः मध्ये त्वतलो-
रिति भावप्रत्ययमात्रोपलक्षणम् अत एव भावप्रत्ययेनेति हरिः ४५। येवदन्ति कृदादीनां द्रव्यमात्रं वाचकं न तु संबन्ध-
स्तान्प्रत्याह अर्धजरतीयं स्याद्दर्शनान्तरगामिनाम् सिद्धान्तेषु स्थितं पक्षद्वयं तादृक्षितलक्षणे ४६। अत्र कृदादौ दर्श- १
नान्तरं मीमांसादि तथा हि यदि संबन्धो न वाच्यः कथं तर्हि विशेषणविशेष्यावगाही बोधः तस्य संबन्धनिरूपितत्वात्

कथं चक्षुरादावशक्यस्याप्रकारीभूतस्य पक्षत्वमित्यादौ तस्य विशेषणत्वम् दण्डीत्यादौ संबन्धो न शक्यः इति
त्वमित्यादौ शक्यः इत्यर्द्धजरतीयम् नव्यत्वतलादौ कृत्तद्धितसमासेभ्य इति वचनात् स्वशक्यत्वेनेति चेत् न न्यायसिद्धा
र्थस्य हरिणा संगृहीतत्वात् सूत्रवार्त्तिकभाष्यकारादीन्यतमेनानुक्तत्वात् वचनत्वम् न च प्रकारः स्वरूपमात्रं
तत्त्वभासमानवैशिष्ट्यप्रतियोगित्वमिति वाच्यम् पक्षत्वमित्यादौ विशेषणापत्तेः नैयायिकानां त्ववैलक्षण्यमर्द्ध
जरतीयम् तथाहि वह्निमत्त्वमित्यादौ वह्निसंबन्धाभावप्रत्ययार्थः धूमवत्त्वादित्यादौ धूमादिः प्रत्यासंकेतयास्मिन्
तेसंबन्धाभावप्रत्ययार्थस्तस्मिन्पक्षे तेशक्य एव संबन्धः यस्मिन्पक्षे संबन्धोवृत्तिताको न तस्मिन्पक्षे संबन्धाभावप्रत्य
यार्थ एवन न ज्ञानमेव मतभेदनिबन्धनमिति बोधपितृनिरूपितो जहत्स्वार्थनिष्ठा कल्याण्यां याम् ॥ ७६ । तत्रार्थपरे
भ्यः श्राद्धेभ्यस्त्वतलादयस्ततिपदान्निरूपयति ॥ प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम् धर्ममात्रं वाच्यमिति यद्यप्य
सूपरारभी । ७७ । प्रकृत्यर्थप्रकारत्वं प्रयोगोपाधिमाश्रित्य धर्ममात्रं त्वतलादीनां वाच्यमित्यन्वयः अत्र वार्त्तिके तस्य भा
वस्त्वतलाविति सूत्रे यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति गुणस्य धर्मस्य भावात्सत्त्वाद्द्रव्ये लिङ्गसं
ख्याकारकान्वययोग्ये निवेशः प्रवृत्तिः तद्द्रव्यवाचकात्प्रत्यये सति गोत्वमित्यादौ जातिर्विशेषणं व्यक्तिर्विशेष्यम्
गोनिष्ठा जातिरिति बोधः गुणाभिधायिभ्यः शुक्लादिभ्यो गुणनिष्ठायां जातौ प्रत्ययः स विशेष्यो गुणो विशेषणम् शु
क्लत्वं शुक्लगुणनिष्ठा जातिरिति बोधः गुणिपरेभ्यस्त्वमीभ्यो गुणे प्रत्ययः स विशेष्यः गुणः प्रकारः शुक्लत्वं घटादिनि
ष्ठः शुक्लो गुणः रूपशीतादयस्तु गुणमात्रपराः रूपः शीतः पुरुष इति प्रयोगादर्शनात् घटस्य रूपं पुरुषस्य शीतमिति
प्रयोगदर्शनाच्च तत्र गुणप्रकारकसत्त्वनिष्ठजातिविशेष्यको बोधः जातिवाचिभ्यो गोरश्वादिभ्यो गोत्वमश्वत्वमित्या
दौ शब्दस्वरूपं गोशब्दो जातिवाचकः प्रवृत्तिजातिप्रकारं शब्दविशेष्यको बोधः पाचकत्वमित्यादौ क्रियावाचकेभ्यः
स्वप्रयोगे विक्लित्यनुकूलो व्यापारः स्वाश्रयप्रकारकः क्रियाविशेष्यकः कृत्त्वमित्यादौ तद्धितः पञ्चोपञ्चानां पञ्चानां संज्ञा
तः सैव त्वादिप्रवृत्तिहेतुस्तत्र च कार्यासंभवात् लिङ्गत्वलक्षणप्रयुक्तसंज्ञात्वमपरिभाषासंस्कारः घटत्वमित्यादौ घटे
कावर्ण्यव्यक्तिरितिपक्षस्तदापाद्यविशेषणः घटः इत्यर्थः नानात्वादिति पक्षे जातौ तत्र च कार्यासंभवाद्व्यक्तौ लक्षणा तदे
वमर्थाभिधायिभ्यस्त्वादयः तत्रोपस्थितो धर्मः शक्यः उपस्थितपरित्यागेऽनुपस्थितकल्पनायां प्रमाणाभावात्
लनेगोरवाच्च व्यक्तिप्रकारकोपस्थितधर्मविशेष्यको बोध इति स्थितम् द्वितीयं पक्षमाह यद्वेति वार्त्तिकस्य शब्दो इति

त्वदिप्रत्ययः ९ ६ः

का:८६
कादिपञ्चवर्णानांविका
स्थानेगरत्वमः= सैज्ञा
व्यक्तयः=२
घटेघनिष्ठाजातिः=३

वै. भू.
टी.
९

जाति:

गोशब्दो गोशब्द
वाचकः गोशब्दवा
चकगोशब्दात् ४

त्वेः प्रमाणमस्त्वनाय तथाचतस्य भावइतिस्तत्त्ववार्तिकम् यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति सर्वेषां भावइति भवन्ति
वाचकत्वेन प्रवर्त्तन्ते इति भावाः शब्दाः स्वेनार्थेन करणभूतेन हेतुभूतेन वा भवन्ति प्रवर्त्तन्तेऽर्थप्रत्यायनाय इति शेषः येन
हेतुकमणानप्रत्येन यतः कारणात् यः शब्दो यत्र प्रवर्त्तते पदार्थे स हेतुकरणान्यतरस्तस्य शब्दस्यार्थः प्रवृत्तिनिमित्त
मित्येतिशेषः प्रत्ययार्थाः सर्वपक्षे क्रमाएव विशेष्याः अर्थधर्मा यथायथम् तेष्वाद्यः प्रकारोनन्तरमुक्तिरिति भेदः यथा
गोत्वम् गोशब्दप्रवृत्तिहेतुः शुक्लत्वमिति द्वेधा गुणिभ्यः शुक्लशब्दप्रवृत्तिहेतुर्गुणः गुणेभ्यः शुक्लशब्दप्रवृत्तिहेतुः सामा
न्यम् डित्थम् डित्थशब्दप्रवृत्तिहेतुः संज्ञा तत्त्वल्लक्षणसंनिन्ति पाचकत्वम् पाचकशब्दप्रवृत्तिहेतुर्जातिः स्पष्टोलक्षणम् स्वमेवप्र
त्वपादाय यच्छब्दस्य प्रवृत्तिनिमित्तं भावइति किंवदन्ती निमित्तत्वेनतत्रावभाषितत्वमात्रविवक्षितं न तु जन्यजनकभावः १७
जायते तज्जन्यबोधप्रकारे भावसंज्ञिते प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् ४८। तेः प्रकृतिभूते शब्दे जन्यो यो बोधस्तत्र
यः प्रकारो विशेषणं तत्र अर्थात् परास्तत्वात् तदो जायमाना इति सर्वेभ्यो कचरमपादे नान्वयः किंभूते प्रकारे भावसंज्ञिते भावइति सं
ज्ञासंजातास्य तारकादित्वादितच् संज्ञकइतिवापाठः तदेवं पक्षद्वये शब्दोपस्थाप्यो धर्मो भावः स च प्रथमे धर्मी विशेषणं द्वितीये
तु शब्दइतिस्थितम् पं० श्रीवनमालिमिश्रकृतायां वैयाकरणमतोन्मज्जनटीकायां भावप्रत्ययोल्लासोऽष्टमः ९०। सास्य
देवतेत्यत्र विचार्यन्ते त्रिभिः पद्यैः आग्नेयमाह प्रत्ययेति देवताविशिष्टे देयं प्रत्ययार्थः तत्र च देवताविशेषणं देयं विशेष्यम् प्र
त्ययार्थस्य विशिष्टस्यैकदेशे विशेषणीभूतायां देवतायां प्रकृत्यर्थो विशेषणम् ४८। अग्नेर्देवताग्निसंसर्गः आग्नेयादौ विशिष्य
ते देवतायां प्रदेये च त्यागः स्वः शाब्दिकैस्तथा ४९ तत्संस्थानमित्रदेवतादेयं चवीधीतिबोधः अत्र पक्षे देवतापदार्थैकदेशः द्विती
यम् देवतायामिति अत्रोभयोरपि पदार्थत्वे नोपस्थितिः विशेषणविशेष्यत्वेनान्वयः ४९ तृतीयम्। प्रदेयएववाग्निः अक
तेस्त्वत्वलक्षणा देवतायां निरूढेति सर्वपक्षास्मीस्थिताः ५०। प्रदेयमात्रप्रत्ययार्थः प्रकृतेस्त्व देवतायां निरूढलक्षणा त्वन्व
यः गुणप्रधानत्वेन भगवत अग्निस्वत्वेन नान्वय प्रथमान्ते निरूढलक्षणया देवतावाचकः शब्दस्तद्धितस्यार्थं प्रत्ययमुत्पादयतीति सू
त्रार्थः निरूढलक्षणेति किम् अग्निप्रभृतिभ्यो माणवकादिसंकेतितेभ्यो मा भूत्प्रत्ययः ५०। इति देवताल्लासे देवताप्रत्ययार्थो
ल्लासः एकादशः ५१। तदस्याप्रहरणमिति क्रीडायां णप्रत्ययार्थं विचारयन्ति क्रीडायां णस्तदस्यास्तीत्यादावेवं विदस्मता
वस्तुतो दण्डिरेवेति नास्तीव प्रथमान्ते ५२। प्रहरणं पदार्थैकदेशः क्रीडा प्रत्ययार्थः पदार्थे तेनोभयमेववा क्रीडामात्रं वा प्रत्यया १०
र्थः प्रकृतेः प्रहरणे निरूढलक्षणा गुणप्रधानेत्वयम्तत्र येपित्वम् दिमिति एतज्जातीयमन्यदप्येवमेव तथाहि सोऽस्यनि

वासः सास्मिन्पौर्णमासीति संज्ञायामित्यादि वस्त्रवस्त्रवृत्तेरेकार्थीभावरूपत्वात् विशिष्टे विशिष्टरूपताक्लिप्तिरिति प्रकृति
प्रत्ययार्थविचारणायापल्लोनक्रियतइत्याह वस्त्रनइति ५१ इति श्रीअभिनन्दिनोःनासोहादशः १२ अभेदैकत्वसंख्याया
वृत्तौ भानमितिस्थितिः कपिञ्जलालम्भे त्रित्वं यथान्यायान्नीयते ५२ । इत्यौक्तमहितसमासेकयोर्याह्नैः अभेदैनैकत्व
म् एकत्वमेवप्रतीयते नहि द्वित्वादेः न्यायसिद्धोपमर्यानवाचनिकस्मात् कपिञ्जलेति कपिञ्जलानालभेदिस्यवचो
दनायांबहुत्वस्य त्रित्वेनैवकत्तार्थतादस्यतार्थस्य चनिर्धारितयाफलानालभेनैव तल्लाद्विति विशिष्टालम्भः एवं प्रकृतियाध
त्ययैहवनस्यावशूपकत्वात्तस्य चैकत्वेनैवकृतार्थत्वात्द्वित्वादिप्रतीतौ मानाभावः एकयोषित्वेकत्वमपि नप्रतीयते प
कविभंक्त्यातिरूक्विस्तरणाल्लिद्वानितेयाम् नैमित्तिकप एकोप्राक्शतिवास्तवस्त्रायोनकेचिदाहुः इत्याचैकत्वमपिनप्र
तीयते अभेदैकत्वेत्यत्रैकत्वस्याविवक्षणात् संख्याभेदेनसंख्यात्वेनरूपेणप्रत्ययः नत्वैकत्वाभानेयुक्तिनौपलम्भनेत्यव
शिष्यते यद्वा सर्वपदार्थावीनोपदार्थैकदेशत्वाद्विशेषणानर्हत्वादेकत्वादीनां विशेषणत्वाज्ञानेहेत्वयः ५३ इत्यभेदैकत्व
संख्यास्वरूपनिरूपणोत्लासस्रयोदशः १३ संख्याप्रसंगात्तत्संबन्धान्तरं निरूपयति तस्याउद्देश्यसंख्याचतत्त्वानौमतेप
तः ग्रहंसंमार्ष्टीत्यादोराम्रयणमनाकरम् ५३ । उद्देश्यविधेययोः संख्याया विवक्षा विवक्षेत्त्वाद्वोधात् नतद्युणोसंख्या
विवक्षिताविधेयेत्तविवक्षितेति मीमांसकप्रत्याग्रसमासिराद्वन्त्यः उद्देश्याविधेययोः संख्याया अविवक्षाविशेषेयलक्षः
सरूपाणामेकशेषएकविभक्तौ एकःसर्वपदयोरित्यव यथाक्रममेकूय इत्यम् मीमांसकमर्यादेरीकारेत्वमिहम नपाठि
कर्त्तरीप्सिततमंकर्मेत्यादेर्व्याद्दीनांकर्मत्वालाभात् ५४ । यद्वा विधेयभेदकंतत्रमन्यतोनियमोनहि यथैकत्वादिदेत्व
नामाश्रयणमनाकरम् ५५ विधेयस्यपरिशेषणांतत्रमेव मन्यनइति सन्धामधाहैवत्वमितित्र्यायेनाम्पाद्वेनाश्र
त्वायलाभः नियमोनहीति कचिद्विवक्षैव यथाद्याख्यातिपदिकात् धातोः प्रत्ययःरत्वैकत्वस्य कचिन्नकर्त्तरीप्सिततमं
कर्मेत्यादौ एवंचसतियद्वक्ष्यतेप्रदीपकारादिभिर्येहैकत्वादिवदविवक्षा विधेयत्वात् तत्र यद्वाणमत्रवाधत्वात् एषुकृत्व
वदिवक्षेत्यपि चिन्त्यमभयतोव्यभिचारात् तस्माद्वोधएवतत्त्वाणमितितत्त्वम् एवंस्थितेसरूपसूत्रे एकःसर्वपदयोरित्यत्र
चैकयद्दणंनकर्त्तव्यं भवति ५४ । ननुविधेयविशेषणास्य तत्त्वेरदाभ्यांनिज्ञातोनः सर्वस्यचहत्स्यनेनभिन्नरूपादेकथनका
रकैद्वयलाभः स्यादित्याह दराभ्यांवाक्यभेदेनकारद्वयलाभतः नतिर्नैवास्तितत्रतेविधेयेभेदकस्यत ५५ दराभ्यामित्ये
कदेशेनसूचंलक्ष्यते विधेयेयद्विशेषणांनस्यतत्रत्वेत्तत्तिर्नोक्ष्येवेत्यन्वयः ५५ समानकर्त्तृकयोःपूर्वकालेइतिसूत्रात्समानक

वै. भू. टी. १२

यकाश्रयभोजनतदुत्तरवर्तमानव्रजनक्रिया

ऽनेकत्वं क्त्वावाच्यमिति वैयाकरणमतमिति नैयायिकानां धर्मं निरसितं क्त्वाद्यर्थं निरूपयन्ति अव्ययकृत इत्यस्येतैः प्रकृत्यर्थ
तुमादयः समानकर्तृकत्वादिद्योत्यमेषामिति स्थितिः ५९। अव्ययकृतो भावे इति भाष्यादित्यर्थः तुमादयस्तुमुनादयः
समानकर्तृकयोरित्यत्र द्योत्यार्थपरमित्यार समानेति भुक्त्वा व्रजतीत्यत्र हि भोजनक्रिया व्रजनक्रिया विशेषणं तयोः
सामानाधिकरण्यं परस्परं भावश्चेति संसर्गांशद्योतकाः क्त्वादयः इत्यर्थः किं च पूर्वकालत्वान्यत्वादेर्वाच्यत्वे कस्य प्रत्यय
स्य प्रत्ययार्थविशेष्यत्वनियमात्तस्यैव विशेष्यत्वापत्तेः न चेष्टापत्तिः क्रियाप्राधान्यविरहेणाभीष्टोपहित्वाभावापत्तेः।
न च गुणीभूतक्रियामादायेत्यत्र तिरिति वाच्यम् पाचकादावतिप्रसंगात् धात्वसंबन्धे इति सूत्रबाधापत्तेश्च न च परस्परासंबन्ध
इत्यर्थः गौरवात् यथा विध्यनुप्रयोगः स्यादौ सूत्रात्संबन्धपरस्परायाः पूर्वदर्शनान्यथात्वे लाघवाच्चेति दिक्। इति श्री
वनमालिमिश्रकृतायां वैयाकरणमतोन्मज्जनटीकायां संख्यायाविवक्षाविवक्षाविवेको नाम सप्तदशः १७ इति निरू
पितः प्रपञ्चः॥ वाक्यमित्यादीनि निरूपयन्ति वाक्यस्फोटो इति निष्कर्षे तिष्ठतीति मतस्थितिः साधुशब्देऽन्तर्गता हि बोधकास्त
त्र स्थिताः ५० व्यवस्थितेति व्यवहृतेत्यस्य हेतुमाह स्थितयेत्यादि। अत्र च सर्वदर्शनान्तरस्तावि वदन्ते अपि निष्कर्षे भिन्नमतो वाक्यस्फो
ट इति पुनीति मतस्थिति वैयाकरणानामिति शेषः स्फुटति प्रकाशतेऽर्थोऽस्मादिति स्फोटो वाचक इति यावत् अत्र वेदा[illegible]
क्यमेव वाचकं न तु केवलं पार्थक्यमेव इति प्रकृतिप्रत्ययादिकम् एतदेवाह स्थिताः साधुशब्देऽप्रयोगार्हे पचति रामः स्यादा
व न्तर्गतास्ति विसर्गो यत्र एव वाचका न तु तेऽस्ति विसर्गादिभिः स्मृतास्तूक्ताद्योवाचकाः ५० ननु प्रयोगसमवायिनां
वाचकत्वे गौरवात्स्मृतानामेव लाघवाद्वाचकत्वमुक्तमित्याशङ्क्याह व्यवस्थितेरिति स्मृतानां वाचकत्वे व्यवस्था तत्
था हि रामः इत्यत्र विसर्गेण किं स्मृत इत्यत्र रुत्वं सिः उत्वं रुः कल्पिष्यासि पाणिनीयमते रुः अपरेण रुः ये नैदानीं व्याक
रणसन्निपातः प्रवृत्तस्य विनिगमनाविरहात् प्रतिबन्धः व्यवहृते इति वृद्धव्यवहारस्तावन्मदैशविशिष्टः शक्ति
ग्राहकः स च विसर्गादिरेव जायते युक्तमुत्तरमाह तद्धेतुत्वात्तरति स्मर्यमाणानां वाचकत्वे येषां मते वाचकास्ते
भवन्माने स्मारकायानि चास्मन्मते वाचकतावच्छेदकानि तानि भवन्मते स्मारकतावच्छेदकानि तिष्ठ विसर्गत्वादिना स्मा
रकात्वं पाषाणत्व इत्यत्व प्रत्ययत्वादिना तिप्रसंगात् धर्मत्वेन गृहीतो धर्मो वह्निलिङ्गं न तद्दत्वेन किमिति
तिर्ति लादयः उत्सेस्यन्ते इति चेत् न लाघवार्थत्वात् अन्यथैकादशलकारस्थानापत्त्यानुपूर्वीत्यधिकापत्तेः प्रत्यया वक्त
व्याः अस्माकं तु लः कर्मणि च भावे चाकर्मकेभ्यः १ लस्य २ तिप्तस्झिसिप्थस्थ ३ टित आत्मनेपदानाम् ४ पासः से ५

भोजं भोजं व्रजती पाठे

११

सवाभ्यां वामौ ६ सेर्ह्यपिच्च ७ त्वरः प्रथमस्य डारौरसः ८ घात्वङ्गपरस्मै ९ स्वत्तामी १० रतश्च ११ निर्मरितः १२
ऊर्जम् १३ परस्मैपदानां णलतुस १४ तस्थस्थमिपाम् १५ शोन्नः १६ आडुत्तमस्य पिच्च १७ अनोपेयः १८ एरुः
१९ एतेयोगाः विपरीतं गौरवं तुल्यव्यवहारश्चागमादेशन्यायस्तु आगमश्च त्वर्थः। नैयायिकमीमांसकसाधारणं दोष
माह॥ किं चाख्यातेन शत्राद्यैर्लडेवस्मार्यते यदि कथं कर्तृवाच्यत्वं वाच्यत्वे न हि भावय ५८ आख्यातेन तिवादिना
शत्राद्यैः कृद्भिश्च यदि लडेव स्थानी स्मर्यते तर्ह्याख्यातेन कर्तृवाच्यत्वं पित यत्नभावने कृतिकर्मणोर्वाच्यत्वं दुर्लभनीय
किं बीजमिति चेत्। ५८ नामार्थयोरभेदः संसर्ग इति सुस्पष्टाकृतिकन्यथेति चेत्तत्राह नरवा यत्र तिङ् किं नामतादृक्त्विव
स्फुटा नामार्थयोरभेदोपि तत्स्यात्तल्यावधार्यताम् ५९। कृत्त्वे यथा नामतातथ्यात्तर्वा यत्र तिङ् तत्त्वा एतेन वर्णस्फो
टोपि व्याख्यातः आदेशस्य लस्यादेशेन स्मारितः आदेशी वर्णो वाचकस्तन्मते आदेश एव वाचक इति वैयाकरणाः वर्णस्य
लेचत्वेद्वा एकैव वर्णव्यक्तिः सा च नित्या नित्या च नानावर्णव्यक्तयः तासां तदद्व्यः वस्तुतो जातिस्फोटस्य स्थास्य
मानत्वात् जातिनिष्कर्षः क्रियते एकैव वर्णव्यक्तिर्नित्या च ध्वनिकृतो भेदस्तु निर्विवादो च तत्कृता विनिवर्त्तस्थितिः ६०
नन्वेवं पदस्त्वेऽस्थितम् तथा च वार्तिकम् सिद्धं तु वास्तिताव वर्णानां अस्थिरात्विर वचनादुभयोर्विशिष्यन्ते इति एवं स्थि
ते नामार्थयोरभेदः संसर्गस्यापि तत्स्यात् नामार्थयोरिति ५९ पदस्फोटमाह अष्यादेशावाचकश्च पदस्फोटस्ततः स्फु
टो नेयादिषु न हि प्रकृत्यादिभिदास्थिता ६० प्रकृतिप्रत्ययागमादेशादीनां भेदो नास्ति पदस्याखण्डत्वात्। कथं तर्हि भेद इ
ति चेत् उभयं सम्मतं हरिणाप्याह वस्तुसारविवेकापि संप्रमोहोहित्व्यते हरेवेत्यादिश्चाच वाक्यस्फोटं विनिश्चित ६१। स
र्वे सर्वपदादेशारति न्यायेनान्यत्र संमोहः अयं च पदस्फोटोर्थ वस्तुत्त्वभवादिस्त्रैवद्रष्टव्यः तथा च वार्तिकम् अर्थवतानोप
पद्यते केवलेनावचनात् संघातेनार्थगतेरिति। वाक्यस्फोटमाह हरेवेत्यादीति पदावयवीभूतप्रकृतिप्रत्ययसंमोहमिव
वाक्यावयवीभूतपदसंमोहं हरद्वा॥ नन्वाक्यस्य सर्वत्र कृत्स्नपार्क्तिर्ह्नीति चेत्तत्राह अर्थे विशिष्टसंबन्धग्रहणं वै समपदे
लक्षणाद्ध्वनाचेन्नतेद्रर्थेपन्नस्तु तनया ६२। वाक्यार्थेन समं वाक्यीयसंबन्धस्याग्रहणं चेत्तर्हि पदेपि समम् पदस्यापि
वं पदार्थे शक्तिर्न गृहीता यथा साम्प्रतिकमन्नवमतेपरस्परशक्तिग्रहणाभावमते वाक्यस्यार्थः एतदेवाह लक्षणेति
लक्षणादनुशासनात्तत्र वार्तिकभाष्याणामन्यत्र सान्वयस्य पदार्थेनाश्चेच्छक्तिग्रहणं नहि न तच्छक्तिग्रहणमर्थे वाक्यार्थे
तथा लक्षणाच्छक्तिग्रहणमित्यन्वयः अथवा एवं पदसमीत्यरेवाणवयन्या येनोत्ते तिनञ्प्रकृतिप्रत्ययमात्रादौ ह्लतेपनश्रद्धा

नउक्तत्वात् यथा पदस्य पदार्थे शक्तिग्रहणमेव म खण्डवाक्यं समीक्ष्य रेखागवयन्यायेन स्वीकृतं तदवयवान्वयावरो
हयित्वा वाक्यार्थे वाक्यस्य शक्तिग्रहणमित्युक्तं भवति ॥ ६२ ॥ समीपेपि दर्शनान्तरस्यापवर्त्तीयत्रिकमित्याह ॥ सर्वत्रैव वाक्या
र्थो लक्ष्य एवेति ये विदुः । महाभाष्येपीत्यमेवाहुर्लक्षणायाश्च हेयगतिम् ॥ ६३ ॥ सर्वत्रक्लृप्तिशुघ्नाद्ये वाक्यार्थो लक्ष्य एव न शक्यः
इति ये महाविद्वांसोपीत्यमेवाहुः कथमित्याह लक्षणायाः इति लक्षणायाश्च हेयत्वेन गतिमाहुरित्यनुपपद्यते अनुशास
नात्पदस्य पदार्थे व्युत्पादितत्वासेन पश्चात्पदसमुदायस्य विशिष्टेऽर्थे लक्षणेत्यर्थः शक्तिसाम्यात्पदवद्वाक्यस्यापि शक्तिरेव
कल्पनेति तत्त्वपूर्वपक्षव्याख्या: एतौ च वाक्यपदस्फोटौ द्विविधौ पदस्फोटोऽखण्डः सखण्डश्च एवं वाक्यस्फोटोपि अखण्डस
विति तु परमार्थः एकः पदः इत्यत्र तु पद इति वदेकं पदमेकं वाक्यमिह वर्णमालायां पदमिह पदमालायां वाक्यमित्या
दिप्रतीतेः न च पदवाक्ययोरौपाधिकी प्रतीतिरिति वाच्यम् पदादावपि तथात्वापत्तेः यद्यतिरिक्तः पदादिर्नास्ति माऽ
स्तु तदाऽतिरिक्तपदवाक्ये अतिरिक्ते अखण्डे पदवाक्यस्थलेपि वर्णावच्छिन्ने एतौ च वाक्यपदस्फोटौ सैकैर्येन पदत्वं शाखां
येनोच्चारितेनेति प्रतीकमादाय वैयाकरणवर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वाचकत्वमिच्छन्तीति व्याख्यातानि रूपि
तो अर्थवत्सूत्रे भूवादिसूत्रे च वार्त्तिककारैः अत एवोदकितावितिसूत्रे रघुदिरघुवेरयोरितिग्रन्थे भाष्यकैयटेपि ॥ ६३ ॥
विशेषणत्वविशेष्यत्वद्रव्यत्वक्रियात्वगुणत्वकर्तृत्वादीनि केवलान्वयीनीति प्रयोगविशेषं ध्यात्वाऽन्वयव्यतिरेकौ ज्ञे
या विद्याद् ॥ किं गर्भत्वे किं गर्भकी दृग्भातीति नोमते विचारः फलितः सर्वः प्रकृतिप्रत्ययाश्रयः ॥ ६४ ॥ तिङन्तार्थेस्तु
त्वगर्भे उभयगर्भे वा आद्ये क्रियाप्रधानं साध्यावस्थापन्ना च सा इत्यतः तिङन्तोपस्थाप्यात् क्रियोपसर्जनं भवनस्य कर्तृत्वे च यथा
पचति भवति पचय गोधावति आख्यातोपस्थाप्या क्रिया न द्रव्यम् क्रियाशब्दादिभिः कृद्भिश्चोपस्थाप्यं द्रव्यम् लिङ्गाद्यन्वयात्
द्वितीये ब्राह्मणः एवानिमन्त्रब्राह्मणः कर्म क्रियोपसर्जनकः कर्तृप्रधानको बोधः तृतीये क्रियाप्राधान्यम् नदयमयमर्थः
शब्दविशेषस्याशिरसि भारः केनचिद्धेनोपस्थापिता क्रिया द्रव्यम् केनचिन्न द्रव्यम् केनचिद्गुणः केनचिज्जातिः एवम
न्यत्रापि पदार्थेष्ववसेयम् न तु अस्माकं नैयायिकादिवन्न वैव द्रव्यादिषाडशैव पदार्थाः जातिर्भावसममेव तेन द्रव्यं च
समवायिकारणमित्यादौ ग्रहः द्रव्यमस्मन्मते लिङ्गसंख्याकारकाद्यन्वययोग्यम् गुणश्चानेकधा क्वचिन्नैयायिकादि
परिभाषितगुणग्रहणं गुणवचनब्राह्मणादिभ्यश्चापायौ क्वचित्तु पङ्क्त्यादीनाम् सत्त्वे निविशतेऽपैतीति स्वरूपाणाम्
लोपो गुणवचनादित्यादौ शरणं गुणस्य हिताय यत्र च तत्र इयीशब्दानां प्रहृतिरिमं पत्तमा स्मिन्जातिप्राह्वसंनाशब्दकि

लक्षणातिरिक्ताः सर्वे गुणशब्देनोपादीयन्ते यत्तु कौमुदीकारः भावप्रधानयोगान्नोगुणवाच्यत्वनिषेधस्तेन दाशगुणवाचि
नो न निषेधस्त्वरत्नीवाश्रुतम् भावेभावप्रधानयान्वयसमासस्योदाहृतत्वात् संख्यायाः गुणस्य निमानमिमनवगुणश
ब्देन भागः सिद्ध्येद्गुणस्यादेशास्त्रीयादेद्रूपः क्वचिद्गुणशब्देनोपसर्जनमित्यादिवोद्व्यम् कर्मण्यलेपिनानाप्रकारः
क्वचित्कर्मशब्देन क्रियाग्रहणे कर्तरि कर्मव्यतिहारेत्यादौ यत्नेनेयाधिकादीनामाग्रहः पञ्चैव कर्माणीति निरन्निर्दे
शम् गमनग्रहणादेवोत्क्षेपणादीनां ग्रहणात् नेकर्मविशेषा इति चेत् न क्रियाविशेषाणाम नेषामपि सत्त्वात् प
चनीत्यादौ क्वचित्कर्मशब्देन कर्त्रीरीप्सिततमम् कर्मेत्यणीत्यादौ सामान्येपि महासत्ता द्रव्यगुणकर्मस्वेव समवेता
नान्येषु सामान्यादयो निर्मलः विशेषः सन् समवायः सन् अभावः सन्निन्यादिप्रतीतेः औपाधिकी यं प्रतीतिरिति
चेन्न विपरीतस्यापरिहार्यत्वात् विशेषपदार्थसद्भावे न प्रमाणम् तथाहि नेत्यावत्रित्यद्रव्याणां मिथो व्यावृत्त्यर्थं स्वी
क्रियन्ते नत्वेषां व्यावृत्तिः विशेषपदार्थानां मिथो व्यावृत्तिः केनेति एद्ध्याम् विशेषान्तराङ्गीकारः इति चेन्न अनवस्थाप
तेः आधारव्यावर्तकाइति चेन्न आधाराणां व्यावृत्तिर्मिथः कथम् विशेषैरिति चेत् न अन्योन्याश्रयात् स्वरूपेणैव वि
शेषाणां मिथो व्यावृत्तिरिति चेत् तर्हि नित्यद्रव्याणामेव स्वस्वरूपेण मिथो व्यावृत्तिरस्तु समवायाभ्युपगमेपि प्रमाणं वि
न्त्यम् तथाहि घटादौ घटत्वादीयग्रहणाद्यः समवायसंबन्धेन तिष्ठति समवायस्तत्र केन संबन्धेनेति एद्ध्याम् समवा
यान्तरस्वीकारे नवस्था स्वरूपेण समवायावस्थानमिति चेत् तर्हि घटत्वादीनामेवावस्थानं स्वरूपेणास्तु न नाम प्राग
भावसद्भावे न प्रमाणम् कृतेपि प्रायश्चित्ते पापानपगमप्रसंगात् तथाहि कृतस्य पापस्य योऽभावस्तस्य प्रागभावस्या
वश्यकत्वात् अवश्यं प्रागभावविनाशः प्रतियोग्युत्पत्तिरेव च नाशः कृतेनापि प्रायश्चित्तेन किं कृतम् तदेतत्सर्वं दिसंनि
धानोक्तवत्रोगुरुचरणाः किंगर्भेति वस्तुतः क्रियायाभागस्य कल्पितत्वमेवेतिभावः ॥ ९४ ॥ नन्वेवं ग्रन्थस्त्राग्रामा
ण्यप्रसंगइत्याशङ्क्याह ॥ पंचकोशादिवत्तस्मात्कल्पनैषा समाश्रिता उपेयप्रतिपत्त्यर्थात्युपाया ह्यव्यवस्थिताः ९५॥
कोशोभाण्डारः तदप्युक्तं वरुणः पितरं पप्रच्छ किं ब्रह्मेति पितोवाच शरीरम् कियन्तं कालं वरुणेनाध्येवं विभा
व्यस्थितम् पुनः शरीरस्योत्पत्तिविनाशौ वीक्ष्य पितरमुपसंगम्योवाच शरीरस्योत्पत्तिविनाशशीलत्वात्कथं ब्रह्मत्वं पुनः

विशेषगुणाश्र

वै॰ भू॰ टी॰ १२

प्राणोब्रह्मेत्युपदिष्टम् प्राणस्यापिनित्यत्वं दृष्ट्वाविप्रतिपन्नः पितरंपप्रच्छ पुनर्मनोब्रह्मेत्युपदिदेश मनसः अनित्यत्वमुत्पत्तिनाश
श्रवणात्तथैवविप्रतिपन्नः पृष्टवान् पुनर्हृदयपहितआत्माब्रह्मेत्युपदिदेश तस्याप्यनित्यत्वंसमीक्ष्यविप्रतिपन्नःपुनर्जिज्ञासि
तवान् ततःपञ्चम्यामानन्दोब्रह्मेत्युपदिदेश सोपिवस्तुतत्त्वंप्राप एवमिहापि शब्दप्रकृतिः तस्याश्वङ्कुः कस्माच्चिद्धुः।
ततोऽस्मिन्नेवतत्त्वबुद्धौ सत्यामन्त्वबन्धोऽयंमित्येषोऽर्थः ततःप्रत्ययः ततोविकरणः आगमः आदेशः इत्यादिभिरखण्डपद
वाक्येब्रह्मस्थानापन्नेक्रमेणोपदिष्टेपेते प्रक्रियापञ्चकोशस्थानापन्ना आदिशब्देनशाखाचन्द्रन्यायस्थूलारुन्धतीन्यायादयो।
गृह्यन्ते इत्यमाह उपेयेति हियतः उपेयानांवस्तुभूतानांपदवाक्यादीनामुपायाःप्रकृतिप्रत्ययाद्यः तथाहि अभवदि
तितत्वम् अत्रकेषांचिदुपायः भूदिद्यन् भूमेतभूतिः अप्र पदवंत भूदि इतस्य शप् तथारामःइत्यादौस्तः सिः रुः तथा।
तावानित्यत्रसस्त्रीत्यावतुप्रत्ययः आसर्वनाम्नःइतिवतुप्रत्ययः वार्त्तिककीत्याअवतुः टिलोपःइत्यादि आरोपिताय:
प्रक्रियायाःपारम्पर्येणपदवाक्यादातिनिष्कर्षेवाक्ये उपयोगः उपयोगतयाफलीभूतस्यप्रमाणत्वात्पञ्चमप्रामा।
ण्यमितिभावः॥९५॥ नकेवलमस्माभिरेवकल्पितानामुपायत्वमङ्गीकृतमन्यैरपिकल्पितानामुपायत्वमङ्गीकृ
तमित्याह कल्पितानामुपायत्वंस्वीकृतंहिपरैरपि स्वरदैर्घ्यादिपिह्रस्ववर्णेभ्योन्यस्यमन्वते ९६ अत्राङ्गीकृतंतत्र
ह स्वरेति स्वरउदात्तादिः दैर्घ्यादयश्च वर्णेभ्योऽन्यस्यध्वनेर्मन्वते ध्वनिनिष्ठास्तैर्दैर्घ्यादि वर्णआरोप्यतेयथातथोपेय
निष्ठप्रामाण्यमुपायेआरोपितमित्यर्थः।निरूपितावर्णपदवाक्यस्फोटाः।९६। इदानीमतिनिष्कर्षनमपदमीमांसका
दीन्प्रतिप्रतिवन्दीरूपकंदर्शयन्ति शक्यत्वंरवशक्तेर्जातेर्लाघवमीत्यलाम् ओपाधिकोवाभेदोस्तुवर्णानातारमन्दवत्
९७। वराटिकादीनांव्यक्तिनिष्ठाजातिर्वात्पालाघवात् एवंवात्तिकापिशब्दनिष्ठाजातिरेवास्तु व्यक्तिस्फोटेपिजाति
स्फोटसमंतात्वंदर्शयन्ति औपाधिकोवेति अयमर्थः येषांमतेयएवनित्यःपदार्थः सएवतत्तद्रूपपहितःसन्नकारा
दिरुच्यते यथात्वान्तरसंमतंदृष्टान्तमाहुः तारेति तादृशध्वन्युपहितःककारादिस्तारमन्द्रादिरुच्यते एवंनित्यएवपदा १२
र्थोवित्वतात्वाद्यनिरूपोपाधिसंवलितःककारादिःनतुवर्णःपदार्थान्तरम्।९७।एतदेवप्रपञ्चयन्ति पदेनवर्णा।
विद्यन्तेवर्णेष्ववयवाइव वाक्यात्पदानामत्यन्तंप्रविवेकोनकश्चन ९८।यथाऽवयवेभ्योवर्णाएवंपदमध्येऽवयवेष्ववर्णेष्वं

ण्यं वर्णातिरिक्तमेकं पदमित्यादिप्रतीतेः अकारऌकारैकारैकारौकारौकारादिषु रेफादीनामंशतस्त्वाहार्यारो
पेण तद्वस्तुस्थितिः एवं पदे वर्णानामकारत्वाद्याहार्यारोपः तादृग्ध्वन्यवच्छिन्नः स एव नित्यः पदार्थः पदमित्युच्यते ए
वं वाक्यस्फोटेप्याह वाक्यादिति पदानां वाक्यात्प्रविवेको न कोपि तादृग्ध्वन्युपहितो नित्यः पदार्थो वाक्यं घटका
नि तत्र पदानीति त्वाहार्यारोपमात्रमिति भावः ॥ ६८ ॥ अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता कैश्चिद्व्यक्तय
एवास्या ध्वनित्वेन प्रकल्पिताः ६९ ॥ अनेकव्यक्त्यवच्छिन्ना जातिः स्फोट इत्युक्ता कास्ता व्यक्तय इत्यत्राह कैश्चिदिति अ
स्या जातेर्या व्यक्तयस्ता ध्वनयः ध्वन्यवच्छिन्ना जातिरेव स्फोटः ध्वनयश्च व्यक्तयो नातिरिक्ताः यद्वा ध्वन्यवच्छिन्ना जा
तिः स्फोटो वाचिकेति यावत् केचित्तु ध्वनय एव स्फोटः वाचका इति यावत् अत्र भाष्यम् अथवा प्रतीतिपदार्थको
लोके ध्वनिः शब्द इति । ६९ । जातिं व्यक्त्यमभेदेन दर्शयन्ति । सम्प्रासन्नोत्पत्त्योर्भागो प्रतिभावे व्यवस्थितो समं यत्र
सा जातिरसत्या व्यक्तयो मताः ७० यावत्तावो ध्यते किंचिदितरानुपसर्जनम् तावद्वाक्यमनल्पत्वादवाक्यान्तरमिति
स्थितिः ७१ शब्दं निष्कृष्य मात्रां यत्कृतं तत्त्वनिरञ्जनम् ब्रह्मैवेत्यक्षरं शाब्दं तस्मै पूर्णात्मने नमः ७२ श्रोत्राद्विर्न्निश्चगे
गुणैर्महर्षिभिरुदाहृतम् नाहृत्य मालामुग्रत्वाद्विभुर्विजयतेतराम् ७३ भट्टोजीभट्टरचना शिरसा धार्यतां बु
धैः तार्किकान्सर्वमीमांसानिपुणांस्त्वजिगीषुभिः ७४ ॥ इति स्फोटवादसंक्षेपः समाप्तः ॥ ॥ भावः पदार्थ
त्वं प्रति ब्रह्मस्वरूपत्वनिरूपणाय जाते श्रीभगवता हरिणा बहूक्तम् तथाहि संबन्धिभेदात्सैव भिद्यमाना ग
वादिषु जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः १ संबन्धिनः पिण्डास्तेषां भेदाद्वस्तुत एकापि सत्ता गवादि
षु पिण्डविशेषु भिद्यमाना सती गोत्वादिजातिरित्युच्यते तस्यान्वयः एतेन सत्तातिरिक्तगोत्वादिसद्भावे न प्रमाण
मित्युक्तम् संबन्धभेदाद्भिद्यमाने नानेन सत्तातिरिक्तं पदार्थान्तरं जगति न किमपीत्युक्तम् एतदेव प्रपञ्चयन्निति प
व तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ध्वनिविशेषावच्छिन्ना स
त्तैव प्रातिपदिकादिः व्यक्तिविशेषावच्छिन्ना सत्ता प्रातिपदिकार्थः सा च ब्रह्मात्मिकेत्याह सा नित्येति महानात्मा ति
भ्यो ब्रह्मैव तामाहुस्त्वतलादयः ॥

नं॰ १६२

अङ्का. १६२ बस्ता २४

क॰ २४



[illegible]